क.क.६३

बौद्ध (कर्मकाण्ड)

श्रीः

श्रीमोक्षविलासहितं

सन्ध्योपासनविधानम्

प्रस्तोता

लोकनाथ आचार्यः

क. का. ६३

श्रीः

श्रीमोक्षविद्यासहितं

सन्ध्योपासनविधानम्

प्रस्तोता

लोकनाथ आचार्यः

६२

प्रकाशक

मोहनप्रसाद बाँस्कोटा

कमलपोखरी, काठमाडौं

२१८५२
Acc: 21852

प्रथम संस्करण वि. सं. २०५१

सर्वाधिकार सुरक्षित

इतरबाट पुनर्मुद्रण गर्नुपर्दा पूर्व स्वीकृति अपेक्षित छ।
तर व्यापाररिक उद्देश्यबाट प्रकाशन गर्न दिइने छैन।

मुद्रक

लुष प्रेस

नयाँ बानेश्वर, काठमाडौं

फोन नं. ४-७३५८६

मन्तव्य

श्री पं लोकनाथ आचार्यद्वारा "संक्षिप्त मोक्ष विद्यासहित सन्ध्योपासना विधान" नामक प्रस्तुत पुस्तक वर्तमान समयमा निकै नै उपयोगी हुनेछ भन्ने विश्वास मैले लिएको छु ।

गायत्री अनुष्ठान विधिलाई सरलतापूर्वक शास्त्रीय आधार दर्शाएर पं. लोकनाथ आचार्यज्यूले प्रस्तुत गर्नुभएको यो पुस्तक हाम्रो सनातन हिन्दू द्विजादि ब्राह्मण समुदायलाई सजिलोसँग सम्झाउन समर्थ छ भन्ने मलाई लागेको छ ।

भविष्यमा पनि आदरणीय पण्डितज्यूबाट यस्तै प्रस्तुतिहरू हामीहरूले पाउने नै छौं भन्ने आशा राखी मेरो विचार यही टुंग्याउँछु ।

मोहनप्रसाद बाँस्कोटा
कमलपोखरी, काठमाडौं
दिनाङ्क:- आश्विन शुक्ल द्वादशी
(३०।६।२०५१)

प्रस्तावना

अभिषिक्त, पवित्रात्मा शङ्करानन्दब्रह्मविद्
द्वितीय–पूजनीय श्रीअर्जेल गुरु माधव ।
जस्को सुदृष्टिपर्नाले, भयो जीवन प्रज्वल
दुबैमा युगपत् गर्छु संप्रणाम निरतर ।।

प्रणाम गर्छु हे मात तुरीया ब्रह्मरूपिणि !
तिम्रो स्मरण मात्रैले यो संसार तरिन्छ नि ! ।।

गन्धर्वतन्त्र को यो हो शिववाक्य भने अरू ।
रुद्रयामलमा हेरौं– 'नित्या श्री सुखरूपिणी' ।।

''देवदेवीति या देवी वेदमाता सरस्वती ।
गायत्री त्रिपदा देवी त्र्यक्षरी भुवनेश्वरी ।

चतुर्विंशाक्षरा विद्या सा चैवाभीष्टदेवता ॥
परा परात्मा परमा कला ब्रह्मस्वरूपिणी ।
गायत्री सा महेशानि ! परब्रह्मात्मिका मता ॥
यां देवीं च वरारोहे ! चेतसा चिन्तयाम्यहम् ।
ऐश्वर्यञ्च ततः प्राप्तं वरदादित्वमेव च ॥
'गायत्री वेदजननी गायत्री पापनाशिनी ।'
गायत्र्यास्तु परं नास्ति दिवि चेह च पावनम् ॥
हस्तत्राणप्रदा देवी पततां नरकार्णवे ।
तस्मात्तामभ्यसेन्नित्यं ब्राह्मणो नियतः शुचिः ॥"

यो शङ्खस्मृतिको वाक्य, गायत्री कल्पमा अनि ।
गायत्री 'स्तव' गायत्री–रहस्यहरूमा पनि ।
दिए दृष्टि पता लाग्छ गायत्री सबकी मुमा ॥

सज्जनवृन्द ! स्मरण रहोस् आजभन्दा पहिले यो पवित्र पुण्यभूमि (भारतवर्ष–आर्यावर्त) मा हाम्रा पूर्वज ऋषिकुलज ब्राह्मण एवं क्षत्रियकुलभूषण महानुभावहरू प्रतापी, धर्मिष्ठ, परोपकारक, भक्तवत्सल; तेजस्वी,

मनस्वी, बली, सिद्ध, ऋषिमुनिहरूको अवतरण भयो । आज हामी उहाँहरूको नाम लिइएमा मङ्गल हुने र उहाँहरूलाई प्रातःस्मरणीय सम्झन्छौं । किन कि—

तपोबलं तापसानां ब्रह्म ब्रह्मविदां बलम् । (म. भा. उ. प. अ.३८–७६)

राज्ञां हि बलमैश्वर्यं ब्रह्म ब्रह्मविदां बलम् । (अध्याय ३२-७३ शा. प.)

अनुसार तपस्वीको तपोबल, ब्रह्मज्ञानीको ब्रह्मबल, राजाको ऐश्वर्यबल, सर्वश्रेष्ठ हुन्छ । माथिको उद्धरणमा पनि श्रीसदा शिवले पार्वतीसामु "म परब्रह्मस्वरूपा गायत्री (वेदजननी) लाई हृदयदेखि सम्झन्छु जप्छु, त्यसैले ऐश्वर्य र वरदान दिने सामर्थ्य मलाई प्राप्त छ ।" आज्ञा भएर गायत्रीलाई नै आफ्नो इष्टदेवता मानेको कुरा स्पष्ट्याउनुभएको छ । विविध ग्रन्थ पुराण, उपनिषद् तन्त्र–आगमशास्त्रको अध्ययन गर्दा यही निष्कर्षमा पुग्दछौं कि ती पूर्वज ऋषिमुनि र प्रतापी राजाहरूमा समेत तपोबलरूप ऐश्वर्यभण्डार विद्यमान थियो र त्यसले उहाँहरूलाई 'ईश्वरत्व' शक्ति प्राप्त थियो । त्यो ईश्वरत्व कि वा तपोबलरूपी ऐश्वर्याऽधिक्यले गर्दा देवराज इन्द्रले पनि उहाँहरूको लागि 'इन्द्रासन' छोडेर स्वागत गर्न उद्यत रहनुहुन्थ्यो । ती ऋषिमुनिहरूको शरीरमा अलौकिक शक्ति विद्यमान थियो । त्यो शक्तिको बलले उहाँहरू एकै क्षणमा ठुलाठूला बलवान् संसारी पुरुषलाई भस्म गर्न सक्नुहुन्थ्यो ।

आफ्नो जीव (प्राण) लाई वर्तमान वृद्ध शरीरबाट झिकी अर्को मृतक बालकादि (अर्को जीव नरहेको) जीवधारीको शरीरमा प्रवेश गरी शरीर बदल्न सक्दथे साथै ब्रह्मा, विष्णु, शिव, इन्द्र, अग्नि, वायु, कुवेरादि देवताहरूलाई आफ्नो आश्रममा बोलाएर आफ्नो इच्छानुसारको काम उनीहरूबाट गराउँथे । आफ्नै तपोबलद्वारा सात

लोक चौध भुवन विना छेकथुन इच्छानुसार घुम्दथे । भयानक जीवभक्षक सिंह, बाघ आदि जन्तु भरिपूर्ण भएको वन, पर्वत, पहरामा, एक्लै रुखमुनि निर्भयतापूर्वक धुनि जगाएर बस्थे । ती तपस्वीको भयले अथवा अहिंसासिद्धि प्रभावले उनको सामुन्ने पुग्नासाथै आ-आफ्नो शत्रुभावलाई बिर्सेर मित्रभावको आश्रय लिई आनन्दपूर्वक कालक्षेपण गर्दथे । ऋषिमुनिभावका सन्त महात्माहरू देशदेशान्तरमा भएको घटना लोकमा प्रचार हुनु अघि नै थाहा पाउँछन् र आँखाले देखेजस्तै वर्णन गर्दछन् । जस्तै कष्टसाध्य एवं दुःसाध्य पुरानो रोगले ग्रसित मानिसप्रति तपस्वीको दृष्टिकृपा भयो भने निरोगी मात्र होइन त्यो रोग त्यसको शरीरमा लाग्दै नलागेजस्तो अनुभूति हुने गरी निको पारिदिन्छन् जो हामी देख्ता सुन्दा असम्भवित कुरा जस्तो मान्छौं । तर सबै सत्य देखिन्छ, सुनिन्छ, यो केले ? त्यो हो मन्त्र शक्ति । जुन हाम्रा प्राचीन ऋषिमुनिहरूमा थियो र त्यस शक्तिद्वारा मान्य, आदरणीय तथा पराक्रमी हुन्थे, मानिन्थे । अब त्यही शक्ति हामीमा नरहनाले ऋषिवंशज भएर पनि भयभीत, अल्छी, दुर्बल, आत्मबल नभएको, चुक्ली चाकडी गर्ने नीचदास वृत्तिलाई निःसंकोच स्वीकार्ने भएर नै तुच्छ पुरुषबाट पनि निरादर अपमानित, घृणित हुनुपरेको छ । तपोबल भए त्यस्तो हुनुपर्ने थिएन । तपोबल हुनु भनेको भगवती वेदजननीको आशीर्वाद प्राप्त गर्नु हो । आशीर्वाद प्राप्त विप्रले गरेका यज्ञादिफल निरर्थक हुँदैनन् ।

"जपेन देवता नित्यं स्तूयमाना प्रसीदति । प्रसन्ना विपुलान् कामान् दद्यान्मुक्तिश्च शाश्वतीम् ।"

"ब्रह्मास्त्रं ब्रह्मदण्डं शिरसि शिखमहान्ब्रह्मशीर्षं नमोन्तम् ।
सुक्तं पारायगोक्तं प्रणवपरमहान्वाक्य सिद्धान्तमूलम् ॥
तूर्यं त्रीणि द्वितीयं प्रथममनुमहान्वेदवेदान्तसूक्तम् ।
नित्यं स्मृत्वा तु सारं नियमितचरितं मूलमन्त्रं नमोन्ते ॥१॥

अस्त्रं शस्त्रहतं अघोरसहितं दण्डं च वाजीहतम् ।
आदित्या रहितं शिरोन्तसहितं पापक्षयार्थं परम् ॥
सूर्यान्त्यादिविलोममन्त्रपठनं बीजं शिखान्त्योर्ध्वकं ।
नित्यं कालनियम्य विप्रविदुषां किं दुष्कृतं भूसुरान् ॥" (गा. स्त.)

यसअनुसार गायत्री माताको आशीर्वाद प्राप्त ब्राह्मण ऋषि हुन्छन् । उनी नै यस लोकमा देश, समाज, धर्म, संस्कृतिको रक्षक भएर अन्त्यमा मुक्त हुन्छन् ।

महामाया, भगवती, ब्रह्माण्डनायिका, वेदजननी, ब्रह्माण्ड धारिणी पोषिणी, महाशक्ति, आद्याशक्ति, गायत्री, विश्वमाता हुनुहुन्छ, विश्व कि वा ब्रह्माण्डलाई नाप्ने मूल्याङ्कन गर्ने र मूल्य प्रदान गर्ने शक्ति उहाँमा मात्र निहित छ, जो उहाँको शरण पर्छ, भज्छ, जप्छ, गान गर्छ उसको रक्षा गर्नुहुन्छ, त्यसैले पनि उहाँलाई गायत्री भनिएको हो उहाँलाई प्रसन्न गर्ने विधि विधानशास्त्रमा निश्चित छ ।

गायत्रीको उपासना जपानुष्ठानले इहलोकमा भुक्ति र परलोकमा स्वर्गति एवं मोक्ष पनि पाइने कुरामा जोड दिएर वेदउपनिषद् ऋषिवृन्दले पनि उहाँको शक्तिलाई स्वीकारेका छन् । त्यस्ती गायत्रीको उपासना गर्ने अधिकार द्विजातिले उपनयन कालदेखि प्राप्त गर्दछ, त्यो पाएर पनि यदि कोही मोहवश भएर कर्तव्य पूरा गर्दैन जप्तैन, त्यागदछ भने त्यसको उत्तरोत्तर निम्न गातिमा र भवान्तमा शृगाल, कुकुर, शूकरादि योनिमा पर्ने निश्चित कुराको उल्लेख देवी भागवत स्कं. ११ मा छ । त्यस्तै अन्यत्र पनि प्रशस्त पाइन्छ । पुराणमा मात्र होइन वेदउपनिषद्, तन्त्रग्रन्थ, महाभारत आदिमा पनि गायत्रीको विषय प्रसङ्ग आउँछ र त्यही कुरा पाइन्छ जो माथिदेखि उल्लेख

गरियो । ती सबैको अध्ययन मननले 'इहलोक परलोक साधिका रक्षिका शक्ति केवल गायत्री नै हुन्, यसैले देववृन्दबाट यिनलाई सर्वोपरि स्थान प्राप्त छ' भन्ने निष्कर्षमा पुगिन्छ ।

हंस गायत्री, अजपा गायत्री वा मोक्ष विद्या जे भनिन्छ त्यो एउटै वस्तु हो र यो नयाँ एवं लौकिक उपज होइन किन्तु मोक्षप्रदा ब्रह्मगायत्री जस्तै पूर्ण वैदिक हो, यस कुराको पुष्टि– "हंसः शुचिषद् वसुरन्तरिक्ष." इत्यादि वेद मन्त्र (हंस मन्त्र) बाट पनि हुन्छ । यो मन्त्रले मध्याह्नमा सूर्यलाई अर्घ्य दिने विधान छ, महानारायणोपनिषद्, प्रायः सबै देवदेवीका मन्त्रको भण्डार भने पनि हुन्छ, हाम्रा सन्ध्या विधानका मन्त्र ऋचा पनि धेरै यसमा पाइन्छन्, ब्रह्म गायत्रीको प्रसङ्ग, सर्वत्र पाइएको जस्तो हंस गायत्रीको प्रसङ्ग जहाँतहीँ नपाइएला तर पनि हंसोपनिषद्, परमहंसोपनिषद्, पाशुपत ब्रह्मोपनिषद्, योगशिखोपनिषद्, ध्यानबिन्दूपनिषद्, नारदपरिव्राजकोपनिषद्, ब्रह्मविद्योपनिषद्, परब्रह्मोपनिषद्, त्रिपादविभूतियोगोपनिषद्, महानारायणोपनिषद् आदिमा स्वल्प वा विस्तृत कुनै न कुनै प्रकारले प्रसङ्ग रहेकै पाइन्छ । यसको उपासना अभ्यासको मोक्षफल रहेकोले यसलाई पनि गायत्री जस्तै 'मोक्षविद्या' भनिएको हो । यी दुवै 'वैदिक तन्त्र' ले वेदपुराण र तन्त्र ग्रन्थमा स्थान पाएका छन् । यी दुवै विद्यामा एकसाथ अभ्यास बढाउन उपनिषद् र गायत्रीकल्प, परिच्छेद गन्धर्वतन्त्र पूर्वोत्तर र मेरुतन्त्रमा पनि निर्देशित छ । तर उक्त दुइ विद्या एक अर्काका पूरक हुन् । तर पनि सर्वप्रथम 'ब्रह्मगायत्रीको अनुष्ठान उपासना विना अन्य कुनै पनि विद्या, कर्म, अनुष्ठान, सिद्ध गर्छु' भनी वैदिक अधिकार प्राप्त कसैले भन्छ भने त्यो हिमालयले सागर तर्छु भनेजस्तै असम्भवित सिद्ध हुन्छ भनिएको छ । जसले चाहे त्यो जुन धर्म संप्रदायको होस्, ईश्वरीय सत्ता एवं शक्तिलाई स्वीकारेर कर्म गर्दछ, त्यो समाजलाई हाँक्न शासन गर्न वा कुनै काममा सफलता पाउन सक्षम हुन्छ । आज देशले सिद्धि प्राप्त दक्ष, कर्मिष्ठ आचारवान्, गुरु, पुरोहित, नेता, मार्गदर्शक

खोजेको छ त्यसको उसलाई खाँचो छ। अहिले भविष्यको लागि पनि सोचेर त्यस्तै नागरिक बनाउनुपरेको छ। त्यसको लागि आचार, ज्ञान, उपासना र अभ्यास यी कुरामा विचार पुऱ्याउनु योग्य हुन्छ।

गायन्त्री मन्त्र जपाऽनुष्ठान विधि मूलरूपमा समान पाइन्छ, तापनि प्रक्रिया पक्षमा कतै कतै भिन्नता किञ्चित् मात्र देखिन्छ, त्यो पनि गुरु परम्परागत आचार शाखा भेदले। त्यसमा पनि पूर्वाचार्यहरूले विमर्शात्मक मन्थन गरेर कर्तव्यतर्फ उन्मुख हुन निर्देशन गर्नुभएको छ। उदाहरणको लागि वीरमित्रोदय आह्निक प्रकाशमा दृष्टि दिऊँ। प्रधानतः देवीभागवत, विश्वामित्रकल्प रहस्य, गृहसूत्र, गायत्री पचाङ्ग सबैमा मेल खाने अवश्य अनुष्ठेय– ग्रहणीयता गुरु परम्परागत प्रविधि समेतमा दृष्टिपात गरी स्वल्प समय–साध्य (संक्षिप्त) तर आवश्यकीय गायत्री कल्पोक्त ब्रह्मास्त्रादि मूलभूत कुरा नछुटेको अत्युत्तम विधि वर्तमानले खोजेको तथ्यलाई विचारेर प्रस्तुत गरिएको यस सन्ध्याविधिमा ब्रह्मास्त्रादिको आवश्यकता र साथै मन्त्रहरूको स्वरूप पनि समाविष्ट छन्। यस विधानका बारेमा यो भार आबाल वृद्धले वहन गर्न सक्तछन्? भनिएला। हो! ८ वर्षको बालकले मुरीको धोक्रो उचाल्न सक्तैन सानै उमेरदेखि नै माना पाथी चामलको पोको उचाल्ने बानी बसाल्दै जाँदा उ पछि ३० पाथीको धोक्रो बोक्न सक्ने हुन्छ जस्तो त्यस्तै उपनयनकालमा सावित्रीदान दिई 'द्विजत्व' सम्पादन गरी वेदादि अध्ययनको साथै स्वच्छ र शान्त स्थलमा बसाली आचार, ज्ञान, उपासना र अभ्यासमा क्रमिक रूपले यिनीहरूको संलग्नता बढाउँदै लग्नुपर्छ। ती महान् व्यक्तित्वशाली वशिष्ठादि जस्तै त्रिकालज्ञ हुन्छन्। यसको लागि पश्चिमी विषाक्त हावा र उसले उकेलेका सूक्ष्म कीटाणु यहाँ फैलिएका छन्, त्यसको प्रभावदेखि बालकलाई सुरक्षित राख्नु आवश्यक छ। भाषा सिकोस् तर आचार धर्म नखल्बलाओस्।

गायत्री र गायत्री जप अनुष्ठानको महत्त्वलाई, जानेबुझेका र बुझेर पनि द्विविधामा रहेका एवं पश्चिमी

फन्क्काबातमा रूमल्लिई अनुकरण परायण भएका, पुनश्च, "अँऽऽ यो वैज्ञानिक युगमा यसको के काम !" भन्नेहरू र जप नै नगर्ने पनि धेरै छन् । यस्तो अवस्था विद्यमान छ तापनि दुइ चार कुरामा गरिएको गायत्री अनुष्ठान प्रतिफलले अरू गायत्री माताप्रति निःशङ्कता श्रद्धा विश्वास बढेर नै यो कुत्कुतिपूर्ण प्रस्तुति जनसमक्ष ल्याएको छु । यसमा रहन गएका अल्पता ऊनता बारे गुणैकपक्षपाती सज्जनहरूबाट शिक्षा पाउने आशा लिएको छु ।

हाम्रो नेपाली समाजमा शुरू परम्परादेखि चलिआएको गायत्री आमाको आशीर्वाद प्राप्त गर्नमा समक्ष शास्त्रसम्मत पुरश्चरणविधिसहितको 'सन्ध्याविधान' मुद्रण गरी द्विज, विप्र, श्रोत्रिय, ब्रह्मनिष्ठ, ब्राह्मण (कर्म र आचार परायण) यी सबै प्रकारका द्विजाति र द्विज बालकहरूसम्म पुऱ्याउने संकल्प मैले २०२५ सालमा नै गरेथें, अकिञ्चनत्वले त्यो पूर्ण हुन दिएको थिएन । धेरै समयपछि एक जना मित्रले आफ्ना पुत्रहरूलाई सन्ध्याविधान सिकाइदिन भन्नुभएअनुसार अभ्यास गराउँदै थिएँ । उहाँले मुद्रण गराउने संकल्प गरेर मलाई शान्ति प्रदान गर्नुभयो । उहाँ हुनुहुन्छ केदारप्रसाद भण्डारी । यसको लागि योजना हुँदै थियो, भगवान् पशुपतिनाथले अकस्मात् (स्वर्गीय) धर्मप्राण श्री सर्दार सोमप्रसाद शर्मा बाँस्कोटाज्यूका उत्तराधिकारी उदात्त चरित धर्मप्राण श्री मोहनप्रसाद बाँस्कोटाज्यू (कमलपोखरी) लाई सत्प्रेरणा गर्नुभयो र पहिलो लिखित पुस्तकलाई यो प्रस्तुत 'लघुरूपमा' सन्ध्याविधान मात्र प्रकाशमा ल्याइएको छ । यसको मुद्रणमा लाग्ने आर्थिक भार वहन श्री मोहनप्रसाद बाँस्कोटाज्यूले नै गर्नुभएको छ । उदारात्मा उहाँमा सादर अभिवादनपूर्वक अनन्त अक्षय्य साधुवाद अर्पण गर्दै उहाँको चिरस्थायी सुख, शान्ति, दीर्घायु, समृद्धि, यशोवृद्धिको लागि भगवान् आशुतोष पशुपतिनाथसँग म वैदिक सूक्ति ऋचाहरूद्वारा प्रार्थना गर्दछु ।

मुद्रणमा नचाहँदा नचाहँदै पनि अशुद्धि रहन गएकोमा क्षमाप्रार्थी छु, शुद्धिपत्र दिइएको छ । पद्धतिमा

मिलाउन अनुरोध गरिन्छ । साथै कतिपय त्रुटि पनि होलान् नै तर प्रक्रियात्मक विषय, निर्देशन मात्र यहाँ पर्याप्त हुँदैन । त्यसको लागि गुरुको सहयोग आवश्यक हुन्छ नै । गुरुद्वारा जान्नु सिक्नुपर्छ ।

पुनश्च — मेरा शुभेच्छु केशवप्रसाद अधिकारीज्यू, केदारप्रसाद भण्डारी आदि मित्रगण तथा मुद्रणालय लुव प्रेस परिवार एवं परमहितैषी रुक्मनाथ पौडेलज्यूप्रति कृतज्ञता व्यक्त गर्दछु ।

प्रस्तोता

लोकनाथ आचार्य

(पशुपति)

हाल

कालिमाटी, सिनामङ्गल

का. न. पा. नं. वडा ९

वसन्तपञ्चमी, वि. सं. २०५१

विषय-सूची

विषय	पृष्ठ
१. मन्तव्य	क
२. प्रस्तावना	ख
३. नित्य–कर्मविधौ प्रातःकृत्यम्	१
४. संक्षिप्त अजपाजप विधि	१
५. प्रकारान्तरेण अजपाजप विधि	५
६. समयाऽभाववताङ्कृते	९
७. प्रातःकृत्यम्	१०
८. नित्यस्नानविधिः	११
९. प्रातः सन्ध्या	१२

विषय	पृष्ठ
१०. त्रिकालसंध्यायामर्ध्यदान विषये	४६
११. प्रस्त्र प्रयोगः	४८
१२. ब्रह्मास्त्र ब्रह्मदण्डादि	४८
१३. ब्रह्मास्त्र–ब्रह्मदण्ड–ब्रह्मशीर्षाणां ध्यानम्	५१
१४. संकलीकरणे ध्यानम्	५२
१५. ब्रह्मास्त्रम् (मन्त्र)	५३
१६. ब्रह्मदण्डम् ”	५३
१७. ब्रह्मशीर्षम् ”	५४
१८. कालातीतप्रायश्चित्तार्घ्यदानम्	५५
१९. संहरणम्	५८
२०. सूर्योपस्थानम्	६२
२१. गायत्रीशापविमोचनम्	६४
२२. प्रातःकालीनं ध्यानम्	७०
२३. मध्याह्न–सायंकालिकं ध्यानम्	७१
२४. शुद्धं गायत्रीध्यानम्	७१
२५. गायत्रीकवचम्	७५

विषय पृष्ठ

२५. गायत्रीकवचम् ७५

विषय	पृष्ठ
२६. वेददीक्षा मन्त्रप्रयोगः	८२
२७. तारामन्त्रप्रयोगः	८४
२८. ताराकवचम्	८८
२९. नित्य हवनम्	९१
३०. शताक्षरीगायत्रीमन्त्रः	९६
३१. सर्वकामप्रदः शताक्षरा-गायत्रीमन्त्रः	९८
३२. क्षुधादि निरसन-गायत्रीमन्त्रप्रयोगः	१००
३३. भोजनविधिः	१०४
३४. देवर्षि-पितृतर्पण प्रयोगः	१०९
३५. यज्ञोपवीताऽभिमन्त्रण-धारण-विधिः (संक्षिप्तः)	१२१
३६. शुद्धिपत्र	१२६

।। नित्य-कर्मविधौ प्रातःकृत्यम् ।।

पञ्चपञ्च उषःकालः सप्तपञ्चाऽरुणोदयः ।
अष्टपञ्च भवेत् प्रातस्ततः सूर्योदयः स्मृतः ।।
रात्रेः पश्चिमयामस्य मुहूर्तो यस्तृतीयकः ।
स ब्राह्म इति विज्ञेयो विहितः स प्रबोधने ।। (देवीभागवत ११।१६)

सूर्योदयात् ५५ घटिका व्यतीते कालः उषाकाल इति, ५७ घटिका व्यतीते कालोऽरुणोदय इति, ५८ घटिका व्यतीते कालः प्रातः काल इति, ततः पश्चाद्वर्तिकालः सूर्योदयकाल इति । रात्रेः पश्चिमयामस्य तृतीयो मुहूर्तः (प्रहर इति भाषायाम्), ब्राह्ममुहूर्तरेति । अतो ब्राह्मे मुहूर्ते उत्थायाऽऽसने चोपविश्याऽऽदौ विशेषतोऽजपागायत्रीं मोक्षविद्यां प्रजपेत् । तद्यथा- ॐ श्रीगणेशाय नमः । श्रीगुरुभ्यो नमः । ॐ ब्रह्मणे नमः ।

कुलदेवतेष्टदेवेभ्यो नमः । ॐ तत्सत् ॐ ऐं ह्रीं श्रीं अद्य पूर्वेद्युरहोरात्राऽऽचरितो-मुच्छ्वास-निश्छ्वासात्मकं षट्शताधिकमेकविंशतिसहस्रसंख्याक्रमजपं गणपति-ब्रह्म-विष्णु-रुद्र-जीवात्मक-गुरुपादुकाभ्यो यथाभागं समर्पयामि । इति कृताञ्जलिः सङ्कल्प्य, बद्धाञ्जलिनैव समर्पयेत् ।

मूलाधारे- चतुर्दले चक्रस्थाय वँ शँ षँ सँ समन्वित-सिद्धि-शक्तिसहिताय स्वर्णवर्ण-गणेशाय षट्शतमजपाजपं समर्पयामि ॐ ऐं ह्रीं श्रीं नमः ॥१॥

स्वाधिष्ठाने- षड्दलचक्रस्थाय बँ भँ मँ यँ रँ लँ समन्वित सावित्रीसहिताय शुक्लवर्णाय ब्रह्मणे षट्सहस्रमजपाजपं समर्पयामि ॐ ऐं ह्रीं श्रीं नमः ॥२॥

मणिपूरे- दशदलचक्रस्थाय डँ ढँ णँ तँ थँ दँ धँ नँ पँ फँ समन्विताय लक्ष्मीसहिताय श्यामवर्णाय नारायणाय षट्सहस्रमजपाजपं समर्पयामि ॐ ऐं ह्रीं श्रीं नमः ॥३॥

अनाहते- द्वादशचक्रस्थाय कँ खँ गँ घँ ङँ चँ छँ जँ झँ ञँ टँ ठँ समन्विताय उमाशक्तिसहिताय श्वेतवर्णाय महेश्वराय षट्सहस्रमजपाजपं समर्पयामि

ॐ ऐं ह्रीं श्रीं नमः ॥४॥

विशुद्धे- षोडशदलचक्रस्थाय अँ आँ इँ ईँ उँ ऊँ ऋँ ॠँ लृँ ॡँ एँ ऐँ ओँ औँ अँ अः समन्विताय अविद्याशक्तिसहिताय धूम्रवर्णाय जीवात्मने एकसहस्रमजपाजपं समर्पयामि ॐ ऐं ह्रीं श्रीं नमः ॥५॥

आज्ञाचक्रे- द्विदलचक्रस्थाय हँ क्षँ समन्विताय मोक्षबीजात्मकाय विद्याशक्तिसहिताय रक्तवर्णाय परमात्मने एकसहस्रमजपाजपं समर्पयामि ॐ ऐं ह्रीं श्रीं नमः ॥६॥

इति समर्प्य, ॐ अद्य सूर्योदयमारभ्याऽहोरात्रेणोच्छ्वासनिश्छ्वासात्मकं षट्शताधिकमेकविंशतिसहस्रसंख्याकमजपाजपमहं करिष्ये इति संकल्प्य अजपामन्त्रेण प्राणायामत्रयं कृत्वा ॐ अद्य श्री अजपागायत्रीमन्त्रस्य हंसः ऋषिः। अव्यक्त-गायत्रीश्छन्दः। परमात्मा हंसो देवता। हं बीजम्। सः शक्तिः। सोहं कीलकम्। ॐकारस्तत्त्वम्। नभस्थानम्। हैमवर्णमुदात्तस्वरे मम मुक्तिसाधने जपे विनियोगः।

ॐ हंसाय ऋषये नमः- शिरसि। अव्यक्तगायत्रीछन्दसे नमोः- मुखे। परम-

हंसदेवतायै नमः- हृदि । हं बीजाय नमः- गुह्ये । सः शक्तये नमः- पादयोः । सोहं कीलकाय नमः- नाभौ । ओङ्कारतत्त्वाय नमः- हृदये । नभसे स्थानाय नमः- शिरसि । उदात्तस्वराय नमः- कण्ठे । हैमवर्णाय नमः- सर्वाङ्गे । मम मुक्तिसाधने जपे विनियोगः । इति बद्धाञ्जलिना, एव ।

हँ साँ सूर्यात्मने स्वाहा अङ्गुष्ठाभ्यान्नमः । हँ सीँ सोमात्मने स्वाहा- तर्जनी-भ्यां स्वाहा । हँ सूँ निरञ्जनात्मने स्वाहा- मध्यमाभ्यां वषट् । हँ सैँ निराभासात्मने स्वाहा- अनामिकाभ्यां हुम् । हँ सौँ अव्यक्तरूपात्मने स्वाहा- कनिष्ठिकाभ्यां वौषट् । हँ सः अनन्ततत्त्वसूक्ष्मादेवी प्रचोदयात्- करतलकरपृष्ठाभ्यां फट्, इति करन्यासः ।

ॐ हँ साँ सूर्यात्मने हृदयाय नमः । ॐ हँ सीँ सोमात्मने शिरसे स्वाहा । ॐ हँ सूँ निरञ्जनात्मने शिखायै वषट् । ॐ हँ सैँ निराभासात्मने कवचाय हुम् । ॐ हँ सौँ अव्यक्तरूपात्मने नेत्रत्रयाय वौषट् ॐ हँ सः अनन्ततत्त्वसूक्ष्मादेव्यै नमः, अस्त्राय फट् । इति तालत्रयं कृत्वा ध्यायेत् । ध्यानमन्त्रस्त्र यथा-

फट्। इति तालत्रयं कृत्वा ध्यायेत्। ध्यानमन्त्रश्च यथा—

गमागमस्थं गमनादिशून्यं सच्चित्प्रकाशं तिमिरान्तकारम् ।
पश्याम्यहं सर्वजगत्प्रकाशं नमामि हं सं परमात्ममूर्तिम् ।।१।।
ॐ द्यां मूर्द्धानं यस्य विप्रा वदन्ति, खम्वै नाभिं चन्द्रसूर्यौं च नेत्रे ।
दिशः श्रोत्रे यस्य पादौ क्षितिं च ध्यातव्योऽसौ सर्वभूतान्तरात्मा ।।२।।
हं सः हकारेण बहिर्याति सः कारेण विशेत्पुनः ।
हंसो हंसेति मन्त्रोऽयं जीवो जपति सर्वदा ।।३।।

।। इति संक्षिप्ताऽजपाजपविधिः ।।

प्रकारान्तरेणजपागायत्रीजपविधानम् ।

ॐ अस्य श्री अजपानामब्रह्मविद्यागायत्रीमन्त्रस्य हंसः। ऋषिरव्यक्तगायत्री-छन्दः परमहंसो देवता। हंबीजम। सः शक्ति। सोहं कीलकम्। प्रणवस्तत्त्वम्। नादस्थानम्। श्वेतवर्णः उदात्तस्वरः मोक्षार्थे जपे विनियोगः।

ॐ शिरसि हं सः ऋषये नमः। मुखे- अव्यक्तगायत्रीछन्दसे नमः। हृदि-परमहंसाय देवतायै नमः। गुह्ये- हँ बीजाय नमः। पादयोः- सः शक्तये नमः।

नाभौ- सोहं कीलकाय नमः। सर्वाङ्गे- तत्त्वाय नमः। मुखे- उदात्तस्वराय नमः। मम मोक्षार्थे जपे विनियोगः। इति कृताञ्जलिना एव।

कराङ्गन्यासः ह्सां सूर्यात्मने अङ्गुष्ठाभ्यान्नमः। ह्सीं सोमात्मने तर्जनीभ्यां स्वाहा। ह्सूं निरञ्जनात्मने मध्यमाभ्यां वषट्। ह्सौं निराभासात्मने अनामिकाभ्यां हुम्। ह्सौं अव्यक्तात्मने नेत्रत्रयाय वौषट्। ह्संः अनन्तात्मने अस्त्राय फट्। इति हृदयादि षडङ्गन्यासः।

अथ ध्यानम्।

हृदयकमलमध्ये सूर्यबिम्बासनस्थं- निखिलभुवनबीजं सृष्टिसंहारबीजम्।
अनतिशयसुखाढ्यं ज्यौतिषं हंसरूपं विततभुवनभावं चिन्तयेदात्मरूपम्॥१॥

अग्नीषोमसरूद्वयं प्रणवकं बिन्दुत्रिनेत्रोज्वलं
भास्वद्रुद्रमुखं शिवाङ्घ्रियुगलं कालाग्निबाहुद्वयम्।
उद्यद्भास्करकोटिकान्तिसदृशं हंसं जगद्व्यापिनं
नित्यानन्दमयं हृदम्बुजकुटीनीडे सदा भावये॥२॥

इति ध्यात्वा मानसोपचारैः पूजयेत् । तथा च–

'लँ' पृथिवीतत्त्वात्मकं गन्धं परिकल्पयामि पूजयामि परमात्मने नमः । [उत्तानकनिष्ठिकाऽङ्गुष्ठाभ्याम्]

'हँ' आकाशतत्त्वात्मकपुष्पं परिकल्पयामि पूजयामि परमात्मने नमः । [अधोमुखाङ्गुष्ठतर्जनीभ्याम्]

'यँ' वायुतत्त्वात्मकं धूपं परिकल्पयामि आघ्रापयामि परमात्मने नमः । [उत्तानाङ्गुष्ठतर्जनीभ्याम्]

'रँ' वह्नितत्त्वात्मकं दीपं परिकल्पयामि समर्पयामि परमात्मने नमः । [उत्तानमध्यमाङ्गुष्ठाभ्याम्]

'वँ' अमृततत्त्वात्मकं नैवेद्यं परिकल्पयामि निवेदयामि परमात्मने नमः– [उत्तानाऽनामिकाऽङ्गुष्ठाभ्याम्]

ॐ ऐं त्रिगुणात्मिका मनोरूपन्ते ताम्बूलं परिकल्पयामि समर्पयामि नमः (अञ्जलिं प्रसार्य) ॐ लँ हँ यँ रँ वँ पञ्चतन्मात्रात्मिका पुष्पाञ्जलिः समर्पयामि ते नमः ।

इति सम्पूज्य यथाशक्ति हंसगायत्रीं जपेत् ।

ॐ हंसः हंसाय विद्महे सोहं परमहंसाय धीमहि तन्नो हंसः प्रचोदयात् । ॐ निरञ्जनाय विद्महे निराभासाय धीमहि तन्नो सूक्ष्मः प्रचोदयात् । ॐ अग्नीषोमाभ्यां वौषट् । ॐ ह्रीं हंसः सोहं स्वाहा । इति यथाशक्ति प्रजप्य सङ्कल्पं कुर्यात् ।

सङ्कल्पः- ॐ तत्सत् पूर्वोच्चरितसिद्धिरस्तु कौडिन्यगोत्रोत्पन्नस्य[1] कौडिन्य वाशिष्ठमैत्रावरुणीति त्रिःप्रवरस्य लोकनाथ इति नामधेयस्य मम पूर्वे सूर्योदयादारभ्याऽद्यसूर्योदयपर्यन्तं भूतोयोऽजपागायत्रींजपोनिश्वासोच्छ्वासरूपेण षट्शतोत्तरैकविंशतिसहस्रसंख्याकस्तत्तद्देवताभ्यो यथाभागं निवेदयामि नमः ।

मूलाधारचक्रे- (१)

वशषसदलयुक्ते सम्यगाधारपद्मे-
तरुणमरुणगात्रं वारणास्यं त्रिनेत्रम् ।

---

१. आ-आफ्नो नाम; गोत्र; प्रवणादि उच्चारण गर्ने ।

अभयवरदहस्तं चारुपाशाङ्कुशोद्यत्

करसुविरक्तमन्यं चिन्तयेदादिमूर्तिम् ।।१।।

ॐ तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि तन्नो दन्तिः प्रचोदयात् । ॐ गँ गणपतये नमः। वँ शँ षँ सँ युक्त चतुर्दलकमलकर्णिकास्थिताय रक्तवर्णाय गजवदनाय, त्रिनेत्राय पाशाङ्कुशवराभयहस्ताय मूषकारूढाय सिद्धिशक्तिसहिताय गणेशाय षट् शतमजपागायत्रीजपं निवेदयामि नमः ।

लिङ्गमूले स्वाधिष्ठानचक्रे- (२)

व भ म य र ल संज्ञैरक्षरैः षट् च पत्रे

सुमुखसुखनिविष्टं पङ्कजे पद्मयोनिम् ।।

अभयवरदहस्तं कुण्डिकां चाक्षमालां

दधतममलभासं चिन्तये विश्वयोनिम् ।।२।।

ॐ वेदात्मनाय विद्महे हिरण्यगर्भाय धीमहि तन्नो ब्रह्मः प्रचोदयात् । ॐ हँ ब्रह्मणे

नमः। बालार्कसदृशं बँ भँ मँ यँ रँ लँ युत षड्दलजलरसतत्त्वात्मकस्वाधिष्ठान-कमलकर्णिकास्थिताय रक्तवर्णाय चतुराननाय वराभयकुण्डिकाक्षमालाहस्ताय हंसारूढाय सरस्वतीशक्तिसहिताय ब्रह्मणे षट्सहस्त्रमजपागायत्रीजपं निवेदयामि नमः।

नाभौ मणिपूरचक्रे- (३)

डाद्यैः फान्तगतैः प्रकल्पितदले पद्मे निविष्टं हरिं
मार्तण्डद्युतिमादिपूरुषमजं नारायणं चिन्मयम्।
हस्तन्यस्तगदारिशङ्खकमलं पीताम्बरं कौस्तुभं
श्रीवत्साङ्कितमिन्द्रनीलसदृशं ध्याये जगन्मोहनम् ॥३॥

ॐ नारायणाय विद्महे वासुदेवाय धीमहि तन्नो विष्णुः प्रचोदयात्। ॐ क्लीं विष्णवे नमः। इन्द्रनीलसदृशं डँ ढँ णँ तँ थँ दँ धँ नँ पँ फँ युत दशदलतेजतत्त्वात्मकमणि-पूरकमलकर्णिकास्थिताय इन्द्रनीलवर्णाय, शङ्खचक्र-गदा-पद्महस्ताय कौस्तुभश्रीवत्सवन-मालाधराय लक्ष्मीशक्तिसहिताय विष्णवे षट्सहस्त्रमजपागायत्रीजपं निवेदयामि नमः।

हृदि अनाहतचक्रे- (४)

काद्यैष्ठान्तगतैः प्रकल्पितदले पङ्केरुहे पार्वती-
कान्तं पूर्णशशाङ्ककोटिसदृशं प्रख्यं कपर्दोज्ज्वलम् ।
शान्तं टङ्कमृगाभयास्पदकरं नागादिभूषोज्वलं
ग्रैवेयाङ्गद-हार-कुण्डलधरं चर्म्माम्बरं चिन्तये ॥४॥

ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात् । ॐ टँ ह्रीँ रुद्राय नमः । इन्द्रगोपसदृश- कँ खँ गँ घँ ङँ चँ छँ जँ झँ ञँ टँ ठँ-युत-द्वादशदलवायुतत्त्वात्म-कानाहतकमलकर्णिकास्थिताय शुद्धस्फटिकसंकाशाय कपर्दिने टङ्क-मृग-वराभयहस्ताय नागादिभूषोज्वलाय वृषभारूढाय कटिचर्माम्बरधारिणे चन्द्रद्युतिश्वेतवर्णाय पार्वतीशक्ति-सहिताय सदाशिव-महेश्वराय षट्सहस्रमजपागायत्रीजपं निवेदयामि नमः ।

कण्ठे विशुद्धचक्रे- (५)

मूर्त्यङ्गेषु निविष्टमङ्गरहितं शान्तं रुचा भासुरं
व्याप्ताशेषचराचरं गुणमयं भावेन सच्चिन्मयम् ।

मूर्तामूर्तममूर्तमेकममलं ज्योतिःप्रदीपोपमं
साक्षात् षोडशवर्णपत्रकमले जीवं परं चिन्तये ॥५॥

ॐ हंसः हंसाय विद्महे सोहं परमहंसाय धीमहि तन्नो हंसः प्रचोदयात् । ॐ सोहमस्मि, सोहमस्मि, ब्रह्माहमस्मि, अहमस्मि, अहमेवाहं मां जुहोमि स्वाहा । ॐ ठं सोहं जीवात्मने स्वाहा । धूम्रप्रभः- अँ आँ इँ ईँ उँ ऊँ ऋँ ॠँ लृँ ॡँ एँ ऐँ ओँ औँ अँ अँः- युतश्वेतवर्णषोडशदलयुताकाशतत्त्वात्मक-विशुद्धकमलकर्णिकास्थिताय गजारूढाय प्रदीपकलिकावर्णाय ज्योतिःस्वरूपाय अविद्याशक्तिसहिताय जीवात्मने सहस्रमजपागायत्रीजपं निवेदयामि नमः ।

भ्रूमध्ये-आज्ञाचक्रे- (६)

हक्षार्णद्वयचारुपत्रकमले दिव्ये जगत्कारणे
विश्वोत्तीर्णमनेकदेहनिलयं स्वच्छन्दमात्मेच्छया ।
तत्तद्योग्यतया स्वदेशिकतनुं भावैकसच्चिन्मयं
प्रत्यक्षाक्षरविग्रहं गुरुवरं ध्याये परं दैवतम् ॥६॥

ॐ गुरुदेवाय विद्महे परमगुरुदेवाय धीमहि तन्नो गुरुः प्रचोदयात् । ॐ गुं गुरवे नमः । हँ क्षँ युत द्विदलमनस्तत्त्वात्मकआज्ञाकमलकर्णिकास्थिताय श्वेतवर्णाय चिन्मयाय वराभयज्ञानमुद्रापुस्तकहस्ताय परापरज्ञानशक्तिसहिताय श्रीगुरुदेवाय सहस्रमजपागायत्री-जपं निवेदयामि नमः ।

ब्रह्मरन्ध्रे सहस्रारचक्रे- (७)

विश्वव्यापिनमादिदेवममलं नित्यं परं निष्कलं
नित्योद्बुद्धसहस्रपत्रकमले लिप्यक्षरैर्मण्डिते ।
नित्यानन्दमनन्तपूर्णपरिचित्सत्तास्फुरत्तात्मकं
स्मृत्वात्मानमनुप्रविश्य कुहरे स्वच्छन्दतः सर्वतः ।।७।।

ॐ परब्रह्मणे विद्महे परमात्मने धीमहि तन्नोऽनन्तः प्रचोदयात् । ॐ नमः सिद्धम् । अँ आँ इँ ईँ उँ ऊँ ऋँ ॠँ लृँ लॄँ एँ ऐँ ओँ औँ अंँ अः कँ खँ गँ घँ ङँ चँ छँ जँ झँ ञँ टँ ठँ डँ ढँ णँ तँ थँ दँ धँ नँ पँ फँ बँ भँ मँ यँ रँ लँ वँ शँ षँ सँ हँ ळँ क्षँ युत सहस्रदल-

कमलकर्णिकास्थिताय सूर्यकोटिप्रकाशाय चन्द्रकोटिसुशीतलाय अनाद्यनन्तायाखण्डाद्वयाय स्वयंज्योतिः स्वयंप्रकाशस्वरूपाय निराभासाय निरामयाय सच्चिदानन्दरूपाय मोक्ष-बीजात्मिकाविद्याशक्तिसहिताय परमात्मने सहस्रमजपागायत्रीजपं निवेदयामि नमः ।

इति निवेद्य पुनः प्रतिज्ञासंकल्पं कुर्यात् ।

पूर्वोच्चारितं सिद्धिरस्तु (कौडिण्यगोत्रोत्पन्नस्य[२] कौडिण्य-वशिष्ठ-मैत्रावरुणी-तित्रिःप्रवरस्य लोकनाथनामधेयस्य मम) अद्यतन सूर्योदयादारभ्य श्वस्तनसूर्योदयपर्यन्तं स्वाभाविकश्वासोच्छ्वासरूपेण षट्शतोत्तरैकविंशतिसहस्रसंख्याकमजपागायत्रीजपमहङ्क-रिष्ये । इति । ॐ ऐं ह्रीं श्रीं हंसः सोहम् ।

अथ प्रार्थना–

हंसो गणेशो विधिरेव हंसो हंसो हरिर्हंसमयश्च शम्भुः ।
हंसो हि जीवो गुरुरेव हंसो हंसोऽहमात्मा परमार्थरूपः ।।

[illegible]
सहस्रसंख्याऽजपागायत्रीजपेन सकलपापहा भगवाञ्छ्रीगुरुः प्रीयतां मयि ॐ तत्सन्न मम। इत्युक्त्वा प्रणमेत् ।

इति मोक्षविद्याऽजपागायत्रीजपविधिः ।

विधिरयंकरणे समयाभाववताङ्कृते संक्षिप्तविधिर्यथा ।

ॐ ऐं ह्रीं श्रीं मूलाधारकमलकर्णिकास्थिताय सिद्धिशक्तिसहिताय गणेशाय षट्शतमजपागायत्रीजपं निवेदयामि नमः ॥१॥

ॐ ऐं ह्रीं श्रीं स्वाधिष्ठानकमलकर्णिकास्थिताय सरस्वतीशक्तिसहिताय ब्रह्मणे षट्सहस्रमजपागायत्रीजपं निवेदयामि नमः ॥२॥

ॐ ऐं ह्रीं श्रीं मणिपूरककमलकर्णिकास्थिताय लक्ष्मीशक्तिसहिताय, विष्णवे षट्सहस्रमजपागायत्रीजपं निवेदयामि नमः ॥३॥

ॐ ऐं ह्रीं श्रीं अनाहतकमलकर्णिकास्थिताय पार्वतीशक्तिसहिताय सदाशिवाय षट्सहस्रमजपागायत्रीजपं निवेदयामि नमः ॥४॥

ॐ ऐं ह्रीं श्रीं विशुद्धकमलकर्णिकास्थिताय, अविद्याशक्तिसहिताय जीवात्मने सहस्रमजपागायत्रीजपं निवेदयामि नमः ॥५॥

ॐ ऐं ह्रीं श्रीं आज्ञाकमलकर्णिकास्थिताय परापरज्ञानशक्तिसहिताय, श्रीगुरवे सहस्रमजपागायत्रीजपं निवेदयामि नमः ॥६॥

ॐ ऐं ह्रीं श्रीं सहस्रदलकमलकर्णिकास्थिताय मोक्षबीजात्मिका–विद्याशक्तिसहिताय परमात्मने सहस्रमजपागायत्रीजपं निवेदयामि नमः ॥६॥

इति निवेद्य पूर्ववत् संकल्प प्रार्थने अर्पणञ्च कुर्यात् ।

इति श्री श्री राघवानन्दनाथस्य शिष्य महादेवानन्दनाथादिदीक्षानामयुत–पूर्व–पूर्वशिष्यवद् दीक्षितस्य श्रीविशुद्धानन्दस्वामिनः शिष्यः शिवानन्द–शङ्करानन्देति दीक्षानामयुतस्य (वासुकि ब्रह्मचारीति प्रसिद्धस्य) शिष्येण आचार्योपनामकेन त्रैलोक्येश्वरानन्दनाथेति दीक्षानामयुतेन लोकनाथेन गुरुतः संप्राप्य लिखितमिति शम् ।

□

॥ अथ प्रातःकृत्यम् ॥

ब्राह्मे मुहूर्ते शय्यात उत्थाय निजहस्तदर्शनमन्त्रः–

ॐ कराग्रे वसते लक्ष्मीः करमध्ये सरस्वती ।
करमूले स्थितो ब्रह्मा प्रभाते करदर्शनम् ॥१॥

शय्यात उत्थाय पृथिव्यां पादस्पर्शनमन्त्रः–

समुद्रवसने देवि ! पर्वतस्तनमण्डले ।
विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥१॥

मलमूत्रत्यागार्थं प्रार्थना–

यत्र कुत्र च देवो वा भूत-प्रेत-पिशाचकाः ।
मलमूत्रस्य त्यागार्थे मम दोषो न दीयताम् ॥१॥

गच्छन्तु ऋषयो देवाः पिशाचा ये च गुह्यकाः ।
पितृभूतगणाः सर्वे करिष्ये मलमोचनम् ।।२।।

मलमूत्रत्यागान्ते मृत्तिकादिना शुद्धिं विधाय वामे गण्डूषमाचरेत् ।

कुर्याद् द्वादशगण्डूषान् पुरीषोत्सर्जने ततः ।
मूत्रोत्सर्गे तु चतुरो भोजनान्ते तु षोडशः ।।

ततो दन्तधावनं नित्यस्नानं कुर्यात् ।

॥ नित्यस्नानविधिः ॥

हस्तौ पादौ प्रक्षाल्य गण्डूषत्रयं कृत्वाऽञ्जलावुदकं गृहीत्वा संकल्पयेत् । यथा— ॐ तत्सत् विष्णुः ३ इत्यादि देशकालकीर्तनान्ते अद्य [कौडिण्यगोत्रोत्पन्नः[२] कौडिण्यवाशिष्ठमैत्रावरुणीति त्रिःप्रवरो]- माध्यन्दिनीयशाखान्तर्गतशुक्लयजुर्वेदाध्यायी [लोकनाथशर्माऽहं[१]] मम काय-वाङ्-मनोकृतकर्मदोषपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं प्रातःस्नानमहं करिष्ये इति संकल्प्य तीर्थं प्रार्थयेत् ।

---

३. र ४. आ-आफ्ना गोत्रप्रवर नाम वाक्य मिलाउने ।

तत्र वरुणप्रार्थना–

अपामधिपतिस्त्वञ्च तीर्थेषु वसतिस्तव ।
वरुणाय नमस्तुभ्यं स्नानानुज्ञां प्रयच्छ मे ॥१॥

जलावर्तनम्–

ॐ उरुᳪ हि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवाऽउ । अपदे पादा प्रतिधातवे करुतापवक्ता हृदयाविधश्चित् । नमो वरुणायाभिष्ठितो वरुणस्य पाशः ॥१॥

ॐ ये ते शतं वरुणं ये सहस्रं यज्ञिया पाशा वितता महान्तः । तेभिर्नोऽअद्य सवितो तद्विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः ।

[मृत्तिकास्नानम्]–

अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे ।
मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतम् ॥

[तीर्थप्रार्थनाऽऽवाहनञ्च]-

नमामि गङ्गे तव पादपङ्कजं सुरासुरैर्वन्दितदिव्यरूपम् ।
भुक्तिञ्च मुक्तिञ्च ददासि नित्यं भावानुसारेण सदा नराणाम् ॥१॥
या गतिर्योगयुक्तानां मुनीनामूर्ध्वरेतसाम् ।
सा गतिः सर्वजन्तूनां गौतमीतीरवासिनाम् ॥२॥
पुष्कराद्यानि तीर्थानि गङ्गाद्याः सरितस्तथा ।
आगच्छन्तु पवित्राणि स्नानकाले सदा मम ॥३॥
त्वं राजा सर्वतीर्थानां त्वमेव जगतःपिता ।
याचित देहि मे तीर्थं तीर्थराज ! नमोऽस्तु ते ॥४॥
अधिष्ठात्र्यश्च तीर्थानां तीर्थेषु विचरन्ति ये ।
देवतास्ताः प्रयच्छन्तु स्नानाऽज्ञां मम सर्वदा ॥५॥
गङ्गे च यमुने चैव गोदावरि ! सरस्वति !
नर्मदे ! सिन्धुकावेरि ! जलेऽस्मिन् सन्निधिं कुरु ॥६॥

कुरुक्षेत्रगयागङ्गाप्रभासपुष्कराणि च ।
एतानि पुण्यतीर्थानि स्नानकाले भवन्त्विह ॥७॥
वाग्वत्यः कौशिकीश्चैव गण्डक्यश्चैव तीर्थकाः ।
आगच्छन्तु पवित्राय स्नानकाले सदा मम ॥८॥
विष्णुपादाब्जसम्भूते ! गङ्गे ! त्रिपथगामिनि ! ।
धर्मद्रवेति विख्याते पापं मे हर जाह्नवि ! ॥९॥
गङ्गा गङ्गेति यो ब्रूयाद् योजनानां शतैरपि ।
मुच्यते सर्वपापेभ्यो विष्णुलोकञ्च गच्छति ॥१०॥

इति प्रार्थ्य एकवारं स्नायात् । यदा स्नाने, असामर्थ्यं तदा मुखं हस्तौ पादौ च पञ्चाङ्गस्नानं विधायाऽऽचमनं कुर्यात् । तत्र प्रमाणम्-

[स्नान गर्न नसके, मुख, हात, पाउ, पञ्चाङ्ग स्नान गरी आचमन गर्ने, प्रमाण]

आमणिबन्धनाद्धस्तौ पादौ चाजानुतः शुचिः ।
प्रक्षाल्य चाऽऽचमेद्विद्वानन्तर्जानुकरो द्विजः ॥ (आह्निके)

ततो जलावर्तनं कुर्यात् ।

ॐ उरुᳪ हि राजा वरुणश्चकार सूर्याय पन्था मन्वेत वा ऽ उ । अपदे पादा प्रतिधातवे करुतापवक्ता हृदया विधश्चित् । नमो व्वरुणायाभिष्ठितो व्वरुणस्य पाशः ।

ॐ ये ते शतं व्वरुणं ये सहस्रं यज्ञिया पाशा वितता महान्तः । तेभिर्नोऽअद्य सवितो तव् विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्क्काः ।

ततः पूर्णाञ्जलिनाऽऽपो गृहीत्वा–

"ॐ सुमित्रिया नऽआपऽओषधयः सन्तु", इति जलेन सन्तर्प्य, "ॐ दुर्मित्रियास्तस्मै सन्तु, योऽस्मान् द्वेष्टि यञ्च व्वयं द्विष्मः ।" इति पठित्वा तीर्थतटे जलं प्रक्षिपेत् । ततः कटिवस्थ्यूरुजङ्घे चरणौ करौ च प्रत्येकं मृत्तोयाभ्यां त्रिस्त्रिः प्रक्षालयेत् ।

ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पाᳪसुरे स्वाहा । (इति सकृन्निमज्य) ॐ आपोऽअस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु । विश्वᳪ हि रिप्रम्प्रवहन्ति देवी (इति पठित्वा सूर्याऽभिमुखो भूत्वा निमज्जेत्) ॐ उदिदाभ्यः शुचिरा पूतऽएमि । [इति निमज्याऽऽचम्य च गोमयं शरीरे लेपयेत् । तत्र मन्त्रः]–

ॐ मा नस्तोके तनये मा नऽआयुषि मा नो गोषु मा नोऽअश्वेषु रीरिषः। मा नोव्वीरान्रुद्र भामिनोव्वधीर्हविष्मन्तः सदमित्वा हवामहे।

[इति निमज्य सूर्यायार्घ्यं दद्यात्। ततश्चुलुकेनात्मानं मार्जयेत्। तत्र मन्त्रः]–

ॐ पुनन्तु मां देवजनाः पुनन्तु मनसा धियः। पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा। ॐ पुनातु, ॐ भूः पुनातु, ॐ भुवः पुनातु, ॐ स्वः पुनातु, ॐ महः पुनातु, ॐ जनः पुनातु, ॐ तपः पुनातु, ॐ सत्यं पुनातु। ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात् सर्वं पुनातु।

□

॥ अथ स्नानाङ्गतर्पणम् ॥

ॐ ब्रह्मादयो देवास्तृप्यन्ताम्, ॐ भूर्देवास्तृप्यन्ताम्, ॐ भुवर्देवास्तृप्यन्ताम्, ॐ स्वर्देवास्तृप्यन्ताम्, ॐ भूर्भुवः स्वर्देवास्तृप्यन्ताम्, ॐ भूर्ऋषयस्तृप्यन्ताम्, ॐ भुवर्ऋषयस्तृप्यन्ताम्, ॐ स्वर्ऋषयस्तृप्यन्ताम् । (अपसव्यं कृत्वा) ॐ कव्यवाडनलादयो दिव्यपितरस्तृप्यन्ताम्, ॐ चतुर्दशयमास्तृप्यन्ताम्, ॐ भूः पितरस्तृप्यन्ताम्, ॐ भुवः पितरस्तृप्यन्ताम्, ॐ स्वः पितरस्तृप्यन्ताम्, ॐ भुर्भुवः स्वः पितरस्तृप्यन्ताम्, ॐ कौडिण्यगोत्रा[५] अस्मत् पितृपितामहप्रपितामहास्तृप्यन्ताम् । ॐ कौडिण्यगोत्रा अस्मन्माता-

---

५- आफ्ना तत्तत् पितृको गोत्र-प्रवर-नाम-वाक्य मिलाउने ।

पितामहीप्रपितामह्यस्तृप्यन्ताम् । ॐ कौडिण्यगोत्रा अस्मन्मातामहप्रमातामहवृद्धप्रमाता-महाः सपत्नीकास्तृप्यन्ताम् ।

अधोलिखितेन मन्त्रेण जलाद्बहिरेकाञ्जलिर्देया–

अग्निदग्धाश्च ये जीवा येऽप्यदग्धा कुले मम ।
भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम् ॥

अथ शिखोदकत्यागः–

लतागुल्मेषु वृक्षेषु पितरो ये व्यवस्थिताः ।
ते सर्वे तृप्तिमायान्तु मयोत्सृष्टैः शिखोदकैः ॥१॥

सव्येनाऽऽचम्य पुनः जलाद्बहिर्भूमौ, एकाञ्जलिं दद्यात् ।

यन्मया दूषितं तोयं शरीर–मलसम्भवैः ।
तस्य पापस्य शुद्ध्यर्थं यक्ष्मै तर्पये तिलोदकम् ॥२॥

अथ मन्त्रोच्चारणपूर्वकं वस्त्रधारणं कुर्यात्-

ॐ परिधास्यै यशोधास्यै दीर्घायुत्वाय जरदष्टिरस्मि । शतञ्च जीवामि शरदः पुरूचीरायस्पोषमभिसंव्यधिष्ये । कुशासनमुपविश्य शिखाबन्धनं मानस्तोक-मन्त्रेण गायत्रीमन्त्रोच्चारणेन च कुर्यात् । ततः शिखां स्पृष्ट्वा मन्त्रं पठेत् ।

चिद्रूपिणि माहामाये दिव्यतेजःसमन्विते ।
तिष्ठ देवि शिखामध्ये तेजोवृद्धि कुरुष्व मे ।।

अथवा ऊर्ध्वकेशि ! विरूपाक्षी मांसशोणितभोजने ।
तिष्ठ देवि शिखामध्ये चामुण्डे चाऽपराजिते ।।

ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ।

ततश्चन्दनतिलकं कुर्यात् । चन्दनधारणस्य महिमा पद्मपुराणे वीरमित्रोदये च-

चन्दनस्य महत्पुण्यं पवित्रं पापनाशनम् ।
आपदं हरते नित्यां लक्ष्मीस्तिष्ठति सर्वदा ।।

ललाटे केशवं विद्यात्कण्ठे श्रीपुरुषोत्तमम् ।
नाभौ नारायणं देवं वैकुण्ठं हृदये तथा ॥
दामोदरं वामपार्श्वे दक्षिणे च त्रिविक्रमम् ।
मूर्ध्नि चैव हृषीकेशं पद्मनाभं च पृष्ठतः ॥
कर्णयोर्यमुना गङ्गा बाह्वोः कृष्णो हरिस्तथा ।
यथास्थानेषु तुष्यन्ति देवता द्वादशः स्मृताः ॥

ब्रह्मपुराणे, वीरमित्रोदये, आह्निकप्रकाशसन्ध्याप्रकरणे च-

ऊर्ध्वपुण्ड्रं मृदा कुर्यात्त्रिपुण्ड्रं भस्मना सदा ।
तिलकं वै द्विजः कुर्याच्चन्दनेन यदृच्छया ॥
न कुर्याद्विन्दुतिलकमिति च पाठः ।

चन्दनधारणमन्त्रः कात्यायनपरिशिष्टे-

ॐ श्रीगायत्र्यै नमः, ॐ सावित्र्यै नमः, ॐ सरस्वत्यै नमः ।

अनन्यचेता यो भक्तः काले सन्ध्यामुपासते ।
कृपया सविता तस्य योग-क्षेमं करिष्यति ॥

अथ भस्मधारणविधिः मन्त्रश्च–

आदौ वामहस्ते विभूतिमादाय त्र्यम्बकमिति मन्त्रेण जलं निधाय (सायंकाले तु शुष्कां विभूतिं धारयेत्) दक्षहस्तेनाच्छाद्य कच्छपमुद्रयाऽभिमन्त्र्य धारयेत् । तत्र मन्त्रं त्रिःपठेत् । ॐ अग्निरित्यादि भस्माभिमन्त्रणमन्त्रस्य पिप्पलाद ऋषिः । कालाग्निरुद्रो देवता भस्माऽभिमन्त्रणे विनियोगः । ॐ अग्निरिति भस्म वायुरिति भस्म जलमिति भस्म स्थलमिति भस्म व्योमेति भस्म सर्वँ ह वा इदं भस्म मन इत्येतानि चक्षूंषि भस्मानि तस्मान्मेतत्पाशुपतं यद् भस्माङ्गानि संस्पृशेत् तस्माद् व्रतमेतत् पाशुपतं पशुपाश-विमोक्षाय । इति त्रिःपठेत् । अभिमन्त्रणान्ते जलेनाऽऽलोड्य विनियोगं पठेत् ।

ॐ सद्योजातमित्यादीनां पञ्चानां भगवनृषिरनुष्टुप्छन्दोलिङ्गोक्ता देवताः भस्मस्ताने (भस्मानात्रिपण्ड्रकधारणे) विनियोगः ।

ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमः । भवे भवे नातिभवे भवस्व मां भवोद्भवाय नमः । ॐ त्र्यायुषं जमदग्नेः । इति ललाटे । ॐ वामदेवाय नमो ज्येष्ठाय नमः, श्रेष्ठाय नमः, रुद्राय नमः, कालाय नमः । कलविकरणाय नमो, बलाय नमो,

बलप्रमथनाय नमः, सर्वभूतदमनाय नमो मनोन्मनाय नमः। इति हृदये। ॐ अघोरेभ्यो-ऽथघोरेभ्यो घोरघोरतरेभ्यः सर्वेभ्यः शर्व्वसर्वेभ्यो नमस्तेऽअस्तु रुद्ररूपेभ्यः। इति नाभौ। ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात्। इति कण्ठे। ॐ ईशानः सर्व्वविद्यानामीश्वरः सर्व्वभूतानाम्। ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मेऽअस्तु सदा शिवोम् ३। इति दक्षिणस्कन्धे। ॐ सद्योजातमिति वामस्कन्धे। ॐ वामदेवाय नमः। इति वामकूर्परे। ॐ अघोरेभ्योऽथघोरेभ्य इति दक्षकूर्परे। ॐ तत्पुरुषाय इति पृष्ठे। ॐ ईश्वरः सर्व्वविद्यानामिति शिरसि। ब्रह्माऽधिपतिरिति सर्वाङ्गेषु।

स्मार्ताचमनम्

हस्ते जलमादाय, अङ्गुष्ठं कनिष्ठिकां चाऽपसार्य वामेन हस्तेन दक्षिण-हस्तं स्पृष्ट्वा प्रतिमन्त्रेणाऽऽचमनं कुर्यात्।

ॐ केशवाय नमः, ॐ माधवाय नमः, ॐ नारायणाय नमः। ततः पात्रान्तरादुदक-मादाय ॐ हृषीकेशाय नमः (गोविन्दाय नमः इति वा) इत्यनेन हस्तं प्रक्षालयेत्।

मादाय ॐ हृषीकेशाय नमः (गोविन्दाय नमः इति वा) इत्यनेन हस्तं प्रक्षालयेत् ।

श्रोताचमनम्

गङ्गा च दक्षिणे श्रोत्रे नासिकायां हुताशनः ।
उभयोः स्पर्शने चैव तत्क्षणादेव शुध्यति ।। (इति पराशरः)

सामान्याऽर्घ्यदानविधिः

सन्ध्यातर्पणादिपुण्यकर्मणामन्ते चाऽर्घ्यं देयम् । तत्रोक्तम् (आह्निके)-

मुक्तहस्तेन दातव्यं मुद्रां तत्र न कारयेत् ।
तर्जन्यङ्गुष्ठयोगे तु राक्षसी मुद्रिका भवेत् ।।

ततोऽधलिखितैर्नाममन्त्रैरेकैकाञ्जलिं दद्यात्-

१) ॐ श्री गणेशाय नमः, २) ॐ सत्यनारायणाय नमः, ३) ॐ ब्रह्मणे नमः, ४) ॐ विष्णवे नमः, ५) ॐ रुद्राय नमः, ६) ॐ देव्यै नमः, ७) ॐ नवग्रहेभ्यो नमः, ८) ॐ इष्टदेवताभ्यो नमः, ९) ॐ कुलदेवताभ्यो नमः, १०) ॐ ग्रामदेवताभ्यो नमः, ११) ॐ पञ्चलोकपालेभ्यो नमः, १२) ॐ दशदिक्पालेभ्यो नमः, १३) ॐ अष्टकुल-

नागेभ्यो नमः, १४) ॐ अष्टवसुभ्यो नमः, १५) ॐ पञ्चभूतेभ्यो नमः, १६) ॐ भूरादि लोकेभ्यो नमः, १७) ॐ साक्षीभूताय नमः, १८) ॐ धर्मराजाय नमः, १९) ॐ चित्राय नमः, (२०) ॐ चित्रगुप्ताय नमः, २१) ॐ श्रवणदेवताभ्यो नमः, २२) ॐ मित्राय नमः, २३) ॐ वरुणाय नमः, २४) ॐ कुवेराय नमः ।

ततः स्नानाङ्गीभूताऽर्घ्यदानम्–

ॐ एहि सूर्य ! सहस्रांशो ! तेजोराशे ! जगत्पतेः !
अनुकम्पय मां भक्त्या गृहाणार्घ्यं दिवाकर ॥१॥

इति श्रीसूर्यनारायणायार्घ्यं दद्यात् । सामान्यार्घोऽयं विशेषः सन्ध्याविधौ ।

एकं वाहननाशाय द्वितीयं शस्त्रनाशनात् ।
असुराणां वधार्थाय तृतीयार्घ्यं विदुर्बुधाः ॥

॥ अथ प्रातःसन्ध्या ॥

पूर्वाऽभिमुखो भूत्वा शिखाबन्धनं कृत्वा तिलकं च कृत्वा आचमनान्ते, अङ्गुष्ठमूलेन ओष्ठौ प्रमृज्य संकल्पं विधाय पवित्रधारणं च कृत्वा कुशान् गृहीत्वा (मन्त्रपूर्वकं शिखा-बन्धनं कृत्वा) ईशानाऽभिमुखः सन् आचामेत् । ततः पवित्रकरणमन्त्रं पठित्वा पवित्रं कुर्यात्– ॐ अपवित्रः पवित्रो वेत्यस्य वामदेव ऋषिः विष्णुर्देवता अनुष्टुप्छन्दः मुखे हृदि च पवित्रकरणे विनियोगः ।

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥

ॐ भूः पुनातु इत्यादिभिश्च आत्मानं पावयेत् ।

आसनपवित्रकरणम्- [आसन शोधन गर्ने]

ॐ पृथ्वीतिमन्त्रस्य मेरूपृष्ठ ऋषिः सुतलं छन्दः कूर्मो देवता। आसनपवित्रकरणे विनियोगः।

ॐ पृथ्वी ! त्वया धृता लोका देवि त्वं विष्णुना धृता।
त्वं च धारय मां देवि ! पवित्रं कुरु चासनम् ।।१।।

आचमने विनियोगो मन्त्रश्च- [आचमन गर्ने]

ॐ ऋतञ्चेत्यघमर्षणसूक्तस्य माधुच्छन्दसोऽघमर्षण ऋषिरनुष्टुप्छन्दो भाववृत्तं दैवतं आचमने विनियोगः[६] ॐ ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत। ततो रात्र्यजायत। ततः समुद्रो अर्णव। समुद्रादर्णवादधि संवत्सरो अजायत। अहोरात्राणि विदधद्विश्वस्य मिषतो वशी सूर्याचन्द्रमसो धाता यथापूर्वमकल्पयत्। दिवञ्च पृथिवीञ्चान्तरिक्षमथो सुवः।

६. यहाँ देवीभागवत, वीरमित्तोदय आह्निक प्रकाशअनुसार आचमन गर्ने।

ततः सप्रणवां त्रिःगायत्रीं पठित्वा वारिणाऽऽत्मानं परिवेष्टय शिरोऽभिविञ्चेत् ।
[तीन चोटि गायत्री मन्त्र पढेर जल आफनो वरिपरि घुमाई शिरमा अभिषेक गर्ने]

विनियोगः– [प्राणायामको विनियोग]

ॐकारस्य ब्रह्मा ऋषिर्दैवी गायत्री छन्दोऽग्निर्देवता शुक्लो वर्णः सर्वकर्मारम्भे विनियोगः ।

ॐ सप्तव्याहृतीनां विश्वामित्र–जमदग्नि–भरद्वाज–गौतमा–त्रि–वशिष्ठ–कश्यपा ऋषयो गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगत्यश्छन्दांस्यग्निवाय्वादित्यबृहस्पतिवरुणे-न्द्रविश्वेदेवा देवता अनादिष्टप्रायश्चित्तो प्राणायामे विनियोगः । ॐ गायत्र्या विश्वामित्र ऋषिर्गायत्री छन्दः सविता देवताऽग्निर्मुखमुपनयने प्राणायामे विनियोगः । ॐ शिरसः प्रजापति ऋषिर्यजुश्छन्दो ब्रह्माऽग्निवायुसूर्या देवताः प्राणायामे विनियोगः ।

निर्देशनम् ।

इति ऋष्यादिकं स्मृत्वा बद्धासनः सम्मीलितनयनो मौनी प्राणायामत्रयं कुर्यात् । तत्र वायोरादानकाले पूरकनामा प्राणायामस्तत्र नीलोत्पलदलश्यामं चतुर्भुजं विष्णुं नाभौ

ध्यायेत्। धारणकाले कुम्भकस्तत्र कमलासनं रक्तवर्णं चतुर्मुखं ब्रह्माणं हृदि ध्यायेत्। त्यागकाले रेचकस्तत्र श्वेतवर्णं त्रिनयनं शिवं ललाटे ध्यायेत्। त्रिष्वप्येतेषु प्रत्येकं त्रिमन्त्राभ्यासः। प्रत्येकमोङ्करादि सप्तव्याहृतयः ॐकारादि सावित्री। ॐ कारद्वय-मध्यस्थः शिरश्चेति मन्त्रस्वरूपम्।

॥ प्राणायाममन्त्रः ॥

ॐ भूः, ॐ भुवः, ॐ स्वः, ॐ महः, ॐ जनः, ॐ तपः, ॐ सत्यम्, ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्, ॐ आपो ज्योती रसोऽमृतम्, ब्रह्मभूर्भुवः स्वरोम्।

हस्ते जलं गृहीत्वा हरिः ॐ तत्सत् विष्णुः ३ इत्यादि देशकालकीर्तनान्ते अद्य कौण्डिण्यगोत्रोत्पन्नः कौडिण्यवाशिष्ठमैत्रावरुणीति त्रिःप्रवरो माध्यन्दिनीयशाखान्तर्गत-शुक्लयजुर्वेदाध्यायी लोकनाथशर्माऽहम् (स्वस्वगोत्रप्रवरादिकं योजयेत्) मम काय–वाङ्-मनोकृतकर्म–जन्य–दुरित–क्षयार्थं श्रीपरमेश्वरप्रीतिद्वारा मोक्षगतिप्राप्तये प्रातः सन्ध्याम् (मध्याह्नसन्ध्यां सायंसन्ध्यां वा) अहमुपास्येइति । अथ मार्जनम् । ॐ भूः पुनातु (शिरसि) ॐ भुवः पुनातु (नेत्रयोः) ॐ स्वः पुनातु (कण्ठे) ॐ महः पुनातु (हृदये) ॐ जनः पुनातु (नाभौ) ॐ तपः पुनातु (पादयोः) ॐ सत्यं पुनातु (शिरसि) ॐ खम्ब्रह्म ॐ पुनातु (सर्वाङ्गे) ।

अथ न्यासः

ॐकारस्य ब्रह्मा ऋषिः, अग्निर्देवता, गायत्रीछन्दः, प्रथमस्वरो बीजम्, पञ्चम-स्वरः शक्तिः, शिवः कीलकम्, विद्युद्वर्णः न्यासे विनियोगः ।

अथ करन्यासः

ॐ भूः अङ्गुष्ठाभ्यान्नमः । ॐ भुवस्तर्जनीभ्यां स्वाहा । ॐ स्वः मध्यमाभ्यां-वषट् । ॐ तत्सवितुर्वरेण्यं, अनामिकाभ्यां हुम् । ॐ भर्गो देवस्य धीमहि कनिष्ठिकाभ्यां

वौषट् । ॐ धियो यो नः प्रचोदयात् करतलकरपृष्ठाभ्यां फट् ।

अथ हृदयादिन्यासः

ॐ भूः हृदयाय नमः । ॐ भुवः शिरसे स्वाहा । ॐ स्वः शिखायै वषट् । ॐ तत्सवितुर्वरेण्यं कवचाय हुम् । ॐ भर्गो देवस्य धीमहि नेत्रत्रयाय वौषट् । ॐ धियो यो नः प्रचोदयात् अस्त्राय फट् ।

अथ व्याहृतिन्यासः

ॐ भूः पादयोः । ॐ भुवः जान्वोः । ॐ स्वः ऊर्वोः । ॐ महः जठरे । ॐ जनः कण्ठे । ॐ तपः मुखे । ॐ सत्यं शिरसि ।

अथ पदन्यासः

ॐ तत् नमः शिरसि । ॐ सवितुर् नमः भ्रूमध्ये । ॐ वरेण्यं नमः अक्ष्णोः । ॐ भर्गो नमः मुखे । ॐ देवस्य नमः कण्ठे । ॐ धीमहि नमः हृदये । ॐ धियो यो नः नमः नाभौ । ॐ प्रचोदयात् नमः पादयोः । ॐ आपोज्योतिरसोऽमृतं ब्रह्मभूर्भुवः स्वरो३म्

अथाऽक्षरन्यासः

ॐ तत् पादाङ्गुष्ठयोः । ॐ स गुल्फयोः । ॐ वि जंघयोः । ॐ तु जान्वोः । ॐर्वं ऊर्वोः । ॐ रे गुदे । ॐ णि लिङ्गे । ॐ यं कट्याम् । ॐ भ नाभौ । ॐर्गो उदरे । ॐ दे स्तनयोः । ॐ व हृदये । ॐ स्य कण्ठे । ॐ धी मुखे । ॐ म तालुदेशे । ॐ हि नासिकाग्रे । ॐ धि नेत्रयोः । ॐ यो भ्रुवोर्मध्ये । ॐ यो ललाटे । ॐ नः पूर्वमुखे । ॐ प्र दक्षिणमुखे । ॐ चो पश्चिममुखे । ॐ द उत्तरमुखे । ॐ या मूर्ध्नि । ॐत् व्यापकं सर्वाङ्गेषु ।

अथ शिरोन्यासः

ॐ आपो गुह्ये । ॐ ज्योतिश्चक्षुषि । ॐ रसः वक्रे । ॐ अमृतम् जान्वोः । ॐ ब्रह्म हृदये । ॐ भूः पादयोः । ॐ भुवः नाभौ । ॐ स्वः ललाटे । ॐ तत्सवितुरित्यादि मूर्ध्नि । इति न्यासाः ।

अथाऽऽवाहनम् (आवाहनादिदशमुद्रां सुविस्तृतरिक्ताञ्जलिं वा प्रदर्श्य)

ॐ गायत्रीं त्र्यक्षरां बालां साक्षसूत्रकमण्डलुम् ।
रक्तवस्त्रां चतुर्हस्तां हंसवाहन संस्थिताम् ॥१॥
ऋग्वेदस्य कृतोत्संगां सर्वदेवनमस्कृताम् ।
ब्रह्माणीं ब्रह्मदैवत्यां ब्रह्मलोकनिवासिनीम् ॥२॥
आवाहयाम्यहं देवीमायान्तीं सूर्यमण्डलात् ।
आगच्छ वरदे ! देवि ! त्र्यक्षरे ब्रह्मवादिनि !
गायत्री छन्दसां मातर्ब्रह्मयोनि नमोऽस्तु ते ॥३॥

मातः आवाहिता भव। स्थापिता भव। सन्निहिता भव। सन्निरुद्धा भव। सन्मुखीकृता भव हुम्। अवगुण्ठिता भव। संकलीकृता भव। अमृतीकृता भव। परमीकृता भव। स्वागता भव। कुशलासि।

अथ मानसोपचारपूजा

ॐ 'लँ' पृथिव्यात्मकं श्रोत्ररूपन्ते गन्धं समर्पयामि नमः। ॐ 'हँ' आकाशात्मकं श्रोत्ररूपन्ते पुष्पं समर्पयामि नमः। ॐ 'यँ' वाय्वात्मकं त्वग्रूपन्ते धूपं समर्पयामि नमः।

श्रोत्ररूपन्ते पुष्पं समर्पयामि नमः । ॐ 'यँ' वाय्वात्मकं त्वग्रूपन्ते धूपं समर्पयामि नमः ।

ॐ 'रँ' वह्न्यात्मकं चक्षुरूपन्ते दीपं समर्पयामि नमः । ॐ 'वँ' अमृतात्मकं रसनारूपन्ते नैवेद्यं समर्पयामि नमः । ॐ 'ऐँ' त्रिगुणात्मिका मनोरूपन्ते ताम्बूलं समर्पयामि नमः (अञ्जलिं प्रसार्य) ॐ लँ हँ यँ रँ वँ पञ्चतन्मात्रात्मिका पुष्पाञ्जलिं समर्पयामि ते नमः । इति मानसोपचारपूजां विधाय ततश्चतुर्विंशतिकां पूजां कुर्यात् । यथा– १) ॐ प्रह्लादिन्यै नमः, २) ॐ प्रभायै नमः, ३) ॐ नित्यायै नमः, ४) ॐ विश्वम्भरायै नमः, ५) ॐ विलासिन्यै नमः, ६) ॐ प्रभावत्यै नमः, ७) ॐ जयायै नमः, ८) ॐ शान्तायै नमः, ९) ॐ कान्त्यै नमः, १०) ॐ दुर्गायै नमः, ११) ॐ सरस्वत्यै नमः, १२) ॐ विद्यारूपायै नमः, १३) ॐ विशालायै नमः, १४) ॐ ईशायै नमः, १५) ॐ व्यापिन्यै नमः, १६) ॐ विमलायै नमः, १७) ॐ तमोरूपहारिण्यै नमः, १८) ॐ सूक्ष्मायै नमः, १९) ॐ विश्वयोन्यै नमः, २०) ॐ जयावहायै नमः, २१) ॐ पद्मालयायै नमः, २२) ॐ अपरायै नमः, २३) ॐ शोभायै नमः, २४) ॐ पद्मरूपायै नमः ।

अथाम्बुप्राशनम् । विनियोगः– ॐ सूर्यश्च मेति ब्रह्मा ऋषिः प्रकृतिश्छन्दः सूर्यो देवता अपामुपस्पर्शने विनियोगः ।

ॐ सूर्यश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्ताम् । यद्रात्र्या पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना रात्रिस्तदवलुम्पतु यत्किञ्चिद्-दुरितं मयि इदमहमापोऽमृतयोनौ सूर्ये ज्योतिषि जुहोमि स्वाहा । (इति सकृदुदकपानं कुर्यात् ।

मध्याह्ने आचमनम्- ॐ आपः पुनन्त्विति विष्णु ऋषिरनुष्टुप्छन्द आपो देवता अपामुपस्पर्शने विनियोगः ।

ॐ आपः पुनन्तु पृथिवीं पृथिवी पूता पुनन्तु माम् । पुनन्तु ब्रह्मणस्पतिर्ब्रह्मपूता पुनन्तु माम् । यदुच्छिष्टमभोज्यं च यद्वा दुश्चरितं मम । सर्वं पुनन्तु मामापोऽसतां च प्रतिग्रह$^{\circlearrowleft}$ स्वाहा । ह$^{\circlearrowleft}$सः इति मन्त्रं च पठेदत्र मध्याह्नसंध्यायाम् । सूर्यार्घ्यं च बद्यावनेन तत्र मन्त्रः ॐ हँ सः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् । नृषद्वरह$^{\circlearrowleft}$ सदृतसद्व्योमसदब्जा गोजाऽऋतजाऽअद्रिजा ऋतं बृहत् इति ।

सायंसन्ध्यायां आचमनम्- ॐ अग्निश्चमेति रुद्र ऋषिः प्रकृतिः छन्दोऽग्निर्देवता अपामुपस्पर्शने विनियोगः ।

ॐ अग्निश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्ताम् । यदह्ना पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना अहस्तदवलुम्पतु । यत्किञ्चिद् दुरितं मयि इदमहमापोऽमृतयोनौ सत्ये ज्योतिषि जुहोमि स्वाहा ।

विनियोगः– ॐ आपोहिष्ठेत्यादि त्र्यृचस्य सिन्धुद्वीप ऋषिर्गायत्री छन्दः आपो देवता मार्जने विनियोगः ।

ॐ आपो हिष्ठामयो भुवः । ॐ तानऽऊर्जे दधातनः ।

ॐ महेरणाय चक्षुसे । ॐ यो वः शिवतमोरसः ।

ॐ तस्य भाजयते हनः । ॐ उशतीरिव मातरः ।

ॐ तस्माऽअरङ्गमामवः ॐ यस्य क्षयाय जिन्वथ (अधः) ।

ॐ आपो जनयथा च नः । (स्वशिरसि)

अथ जलावग्रहणम् । सुमित्रिया दुर्मित्रिया अनयोः प्रजापति ऋषिः आपो देवता अनुष्टुप्छन्दः जलावग्रहणे विनियोगः ।

ॐ सुमित्रिया नऽआपः ओषधयः सन्तु, इत्यपोऽञ्जलिमादाय ॐ दुर्मित्रिया-

स्तस्मै सन्तु योऽस्मान् द्वेष्टि यञ्च वयं द्विष्मः इति द्वेष्टारं प्रति भूमौ क्षिपेत् ।

विनियोगः- ॐ द्रुपदादिवेति कोकिलो राजपुत्र ऋषिरनुष्टुप्छन्दः आपो देवता सौत्रामण्यवभृथे विनियोगः ।

ॐ द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव । पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः । (इति त्रिःशिरसि सिञ्चेत्)

अघमर्षणे विनियोगः- ॐ अघमर्षणसूक्तस्याघमर्षण ऋषिरनुष्टुप्छन्दो भाववृत्तो देवता अश्वमेधावभृथे विनियोगः ।

ॐ ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत । ततो रात्र्यजायत । ततः समुद्रो अर्णवः । समुद्रादर्णवादधिसंवत्सरो अजायत । अहोरात्राणि विदधद्विश्वस्य मिषतो वशी । सूर्याचन्द्रमसौ धाता यथापूर्वकमलपयत् । दिवं च पृथिवीं चान्तरिक्षमथो स्वः (इति वामे प्रक्षिपेत् (अघमर्षण जल बायाँतर्फ फ्याँक्ने)

विनियोगः [आचमनको]- ॐ अन्तश्चरसीति तिरश्चीन ऋषिरनुष्टुप्छन्दः आपो देवता अपामुपस्पर्शने विनियोगः । (त्रिवारं) आचमनम् [तीन पटक आचमन गर्ने]

ॐ अन्तश्चरसि भूतेषु गुहायां विश्वतो मुखः । त्वं यज्ञस्त्वं वषट्कार आपो ज्योती रसोऽमृतम् ॥३॥

विनियोगः (सामान्य अर्घदानको विनियोगः) ॐ भूर्भुवः स्वरिति महाव्याहृतीनां परमेष्ठी प्रजापतिर्ऋषिः अग्निवायुसूर्याः देवताः गायत्र्युष्णिगनुष्टुभश्छन्दांसि । ॐ तत्सवितुरित्यस्य विश्वामित्र ऋषिः सविता देवता गायत्रीच्छन्दः अर्घ्यदाने विनियोगः ।

ॐ भूर्भुवः स्वः ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् । ब्रह्मस्वरूपिणे सूर्यनारायणाय नमः इति सामान्यार्घ्यविधिः ।

अत्र विशेषार्घ्यम् [उल्लिखित समयमा सन्ध्यावादन हुन नसकेमा]

(यदा प्रातः संध्या सूर्योदयात सायंसन्ध्या च सूर्यास्तात् घटिकात्रयं पश्चात् क्रियते तदा निम्नाङ्कितेन मन्त्रेणैकमर्घ्यं प्रदद्यात् । मध्याह्न एकमर्घ्यंदेयम् ।)

ॐ आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥

अत्रोह्यं त्रिकालसन्ध्यायामर्घ्यदानविषये-

ब्रह्मास्त्रं ब्रह्मदण्डश्च ब्रह्मशीर्षमिति त्रिधा ।
अस्त्रप्रयोगं वक्ष्यामि गुह्याद् गुह्यतरं शृणु ॥१॥
शस्त्राणाञ्च स्वरूपञ्च प्रयोगञ्च विदुर्बुधाः ।
एतेषामतुलं ब्राह्ममूर्ध्वं शास्त्रेषु विस्तृतम् ॥२॥
भूसुरैर्यदुपास्यन्ते तदस्त्रं ब्रह्मसीरितम् ।
तदस्त्रं ब्रह्मदण्डं स्यात्तूर्ययुक्ता भवेद्यदि ॥३॥
सशीर्षं स्यादादिभवे तदस्त्रं ब्रह्मशीर्षकम् ।
सृष्ट्यादिकं यदस्त्राणां पूर्ववत्सोपदं हृतः ॥४॥
वर्णानां प्रातिलोम्येन ब्रह्मास्त्रमभिधीयते ।
पादानां प्रातिलोम्येन ब्रह्मदण्डं प्रशस्यते ॥५॥
पदानां प्रातिलोम्येन ब्रह्मशीर्षं प्रशस्यते ।
विलोमेन च गायत्रीं बीज युक्तां सतूर्यकाम् ॥६॥

विलोमेन च गायत्रीं बीज युक्तां सतूर्यकाम् ।।६।।

शिरसा शीर्षसंयुक्तं चतुर्थार्घ्यं विनिक्षिपेत् ।
कालातीतानि कर्माणि त्रिसन्ध्यामपि सर्वदा ।।७।।

चतुरर्घ्यप्रदानेन गायत्रीशिरसा सह ।
एकं शस्त्रास्त्रनाशाय चैकं वाहन-सारथे ।।८।।
असुराणां देहश्चैकं प्रायश्चित्तं चतुर्थके ।
विलोमेनाञ्जलिं क्षिप्त्वाऽप्यनुलोमेन संहरेत् ।।९।।
एवं नित्यं प्रकुर्वीत ब्राह्मणो मुनिपुङ्गवः ।
परमात्मानमात्मा च आत्मानञ्च द्विजोत्तमः ।
आत्मानमात्मना ध्यायेदात्मन्येवोपसंहरेत् ।।१०।।
उत्तिष्ठ देवि गन्तव्यं पुनरागमनाय वै ।
प्रसीद देवि तिष्ठ एवं प्रविश्य हृदयं मम ।।११।।
दद्यात् केवलगायत्र्या मूढोऽप्यर्घ्यं तु यो द्विजः ।
स वै दुर्ब्राह्मणो नाम सर्वकर्मविगर्हितः ।।१२।।

ब्रह्मास्त्रं यो न जानाति स विप्रः शूद्र एव हि ।
नित्यं कामेन विद्येत धर्मार्थं निष्फलं भवेत् ॥१३॥

अथाऽस्त्र प्रयोगः– हरि ॐ इत्यादि देशकालकीर्तनान्ते तत्तत्कालीनं संध्यार्घ्यदानं करिष्य इति संकल्प्य स्वस्वशाखोक्तविधिनाऽर्घ्यदानं कुर्यात् ।

विनियोगः– ॐ अस्य श्रीब्रह्मास्त्र–ब्रह्मदण्ड–ब्रह्मशीर्ष–मन्त्रस्य ब्रह्मा ऋषिः । गायत्रीछन्दः परमात्मा देवता । ऐं बीजम् । यँ शक्तिः । नीं कीलकम् । अस्त्रचतुष्टय-सिद्ध्यर्थे जपे विनियोगः ।

ॐ ब्रह्माऋषये नमः– शिरसि । ॐ गायत्रीछन्दसे नमः– मुखे । ॐ परमात्मा-देवतायै नमः– हृदये । ॐ ऐं बीजाय नमः– गुह्ये । ॐ यँ शक्तये नमः– पादयोः । ॐ नीं कीलकाय नमः जान्वोः ।

ॐ अस्य श्री अर्घ्यदानमन्त्रस्य चतुष्टयस्य सावित्रीभार्गवऋषिः । अनुष्टुबादि-नानाछन्दांसि । सविता देवता । तत्सवितुर्वरेण्यमिति बीजम् । भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् इति शक्तिः । परोरजसे सावदोम् ३ आपो ज्योतिरसोऽमृतं ब्रह्मभूर्भुवः

यो नः प्रचोदयात् इति शक्तिः । परोरजसे सावदोम् ३ आपो ज्योतिरसोऽमृतं ब्रह्मभूर्भुवः

स्वरोम् ३, इति कीलकम् । मम गायत्रीप्रसादसिध्यर्थे जपे विनियोगः ।

ॐ सावित्री-भार्गव-ऋषये नमः- शिरसि । ॐ अनुष्टुबादिनानाच्छन्दोभ्यो नमः- मुखे । ॐ सबितादेवतायै नमः हृदये । ॐ तत्सवितुर्वरेण्यमिति बीजाय नमः- गुह्ये । ॐ भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्- इति शक्तये नमः- पादयोः । ॐ परोरजसे सावदोम् ३ ॐ आपो ज्योती रसोऽमृतं ब्रह्मभूर्भुवः स्वरोम् ३ इति कीलकाय नमः- जान्वोः । मम गायत्रीप्रसादसिध्यर्थे इति सर्वाङ्गेषु स्पृशेत् ।

अथाङ्गन्यासः-

ॐ अघोरास्त्राय शार्ङ्गाय नारसिंहाय सुदर्शनाय अस्त्रराजाय । ॐ वः सुवः भुर्भूः ॐ ह्लः तुयादचोप्र सर्वात्मतेजसे ह्लः अस्त्राय फट् । ॐ अघोरास्त्राय शार्ङ्गाय नारसिंहाय सुदर्शनाय अस्त्रराजाय । ॐ ह्लौं नः यो योधि महासदाशिवात्मतेजसे ह्लौं नेत्रत्रयाय वौषट् । ॐ अघोरास्त्राय शार्ङ्गाय नारसिंहाय सुदर्शनाय अस्त्रराजाय । ॐ ह्लैं हिमधी सदा शिवात्मतेजसे ह्लैं कवचाय हुम् ।

ॐ अघोरास्त्राय शार्ङ्गाय नारसिंहाय सुदर्शनाय अस्त्रराजाय ॐ ह्लैं स्यवदेर्गोभ

रुद्रात्मतेजसे ह्लँ शिखायै वषट् ।

ॐ अघोरास्त्राय शाङ्गार्य नारसिंहाय अस्त्रराजाय ॐ ह्लीँ यंणिरेव विष्णवात्मतेजसे ह्लीँ शिरसे स्वाहा । ॐ अघोरास्त्राय शाङ्गार्य नारसिंहाय सुदर्शनाय अस्त्रराजाय । ॐ ह्लाँ तुः वि सत् त ब्रह्मात्मतेजसे ह्लाँ हृदयाय नमः ।

अथ कराङ्गन्यासः–

ॐ अघोरास्त्राय शाङ्गार्य नारसिंहाय सुदर्शनाय अस्त्रराजाय । ॐ वः सुवः र्भुभूः, ॐ ह्लः तृयादचोप्र सर्वात्मतेजसे करतलकरपृष्ठाभ्यां फट् ।

ॐ अघोरास्त्राय शाङ्गार्य नारसिंहाय सुदर्शनाय अस्त्रराजाय ह्लौँ नः यो योधि महासदाशिवात्मतेजसे ह्लौँ कनिष्ठिकाभ्यां वौषट् ।

ॐ अघोरास्त्राय शाङ्गार्य नारसिंहाय सुदर्शनाय अस्त्रराजाय, ॐ ह्लैँ हिमधी सदाशिवात्मतेजसे ह्लैँ अनामिकाभ्यां हुम् ।

ॐ अघोरास्त्राय शाङ्गार्य नारसिंहाय सुदर्शनाय अस्त्रराजाय, ॐ ह्लूँ स्यवदे-र्गोय रुद्रात्मतेजसे ह्लूँ मध्यमाभ्यां वौषट् ।

र्षाय स्वात्मतेजसे ह्रूँ मध्यमाभ्यां वौषट् ।

ॐ अघोरास्त्राय शार्ङ्गाय नारसिंहाय सुदर्शनाय अस्त्रराजाय, ॐ ह्रीँ यँ णि रे व विष्ण्वात्मतेजसे ह्रीँ तर्जनीभ्यां स्वाहा ।

ॐ अघोरास्त्राय शार्ङ्गाय नारसिंहाय सुदर्शनाय अस्त्रराजाय, ॐ ह्रां तुः वि सत् त ब्रह्मात्मतेजसे ह्रां अङ्गुष्ठाभ्यां नमः ।

अथ ब्रह्मास्त्र–ब्रह्मदण्ड–ब्रह्मशीर्षाणां ध्यानम्

ॐ सर्वास्त्रादित्यहस्तं सुररिपुरुधिरं बोधमुद्राङ्कितं च
भूषारत्नोज्वलाङ्गं द्विजकुलहृदयो भासमादित्यबीजम् ।
मन्देहानामदैत्यग्रसनपटुनटाऽघोरजिह्वाकरालं
ध्यायेद् ब्रह्मास्त्रमाद्यं लयसमयमहावीतिहोत्रस्वरूपम् ।।१।।

सर्वास्त्राणां च शक्त्याक्रममरुण रणत्कारघोरैकपिण्डं
ब्रह्माण्डान्तर्द्विजानामवनिकृतमिदंक्रुद्धिशेषोग्रमूर्तिम् ।
जाज्वल्योग्रं त्रिनेत्रं रविरुपजयति सावितं शस्त्रजालं
भालाक्षां भोजनाभ्यम्बुजभुवनलयं चिन्तयेद् ब्रह्मदण्डम् ।।२।।

तेजःपुञ्जमयं प्रसन्नममलं चाध्यात्मिकं योगिहृत्
ध्यायेद् भूसुरभूषणं निरुपमं श्रेष्ठं त्रिमूर्त्यात्मकम् ।
नित्यं भास्करवाहवैरिपिशितं सुवर्णवपूर्णार्थद-
मस्त्रं ब्रह्मशिरोऽभिधानममलं ध्यायेद्विकर्मादितः ॥३॥

अथ सङ्कलीकरणे ध्यानम्

वज्रायुधसहस्रस्याऽतुलसंहारकारणम् ।
चिन्तयेत् परमात्मानमप ऊर्ध्वं विनिक्षिपेत् ।
गच्छ देवेशि शीघ्रं त्वं दुष्टदैत्यवधं कुरु ॥१॥
परब्रह्मप्रकाशाञ्च शब्दब्रह्मस्वरूपिणीम् ।
गायत्रीं सर्वदेवत्यां ध्यायेऽहं विश्वमातरम् ॥२॥

इति ध्यात्वा मूलाधाराद् दक्षिणनासापुटेन कुण्डलिनीं विकाश्य मुक्ताङ्गुष्ठयोरञ्जलिं निक्षिप्य प्रणवेनोदकं नीत्वाऽनुलोमेन गायत्र्या चाऽभिमन्त्र्य ब्रह्मास्त्र-ब्रह्मदण्ड-ब्रह्मशीर्षकैरर्घ्यत्रयं दद्यात्, इति ब्रह्मास्त्र-ब्रह्मदण्ड-ब्रह्मशीर्षोद्धारः ।

ब्रह्मशीर्षकरर्घ्यत्रयं दद्यात्, इति ब्रह्मास्त्र-ब्रह्मदण्ड-ब्रह्मशीर्षोद्धारः ।

१) अथ ब्रह्मास्त्रम् (विशेष अर्घदान प्रथम)

ॐ ॐ श्रीँ सौँ सौँ ह्रौँ रवेदमा ॐ ॐ ह्रौँ असुरात् संरक्ष-रक्ष-हंसोदयालीन् मर्दय-मर्दय, प्रज्वल-प्रज्वल ॐ त् या द चो प्र नः यो यो धि ॐ हि म धी स्य व दे र्गो भ, ॐ यं णि रे वं तु वि स तत्, ॐ वः सु वः र्भु भू ॐ असुराणां शस्त्रनाशार्थे ब्रह्मास्त्राऽभिमन्त्रितं प्रथमाञ्जलिं प्रक्षिपामि श्रीसवितृनारायणायेदं नमः ।।१।। इत्यर्घ्यं दत्त्वा आत्मसंरक्षणार्थे पुनरर्घ्यदानयोग्यतासिद्ध्यर्थं च "प्रतिचक्ष्वीतिमन्त्रजपं करिष्ये" इति प्रतिज्ञासंकल्पं कुर्यात् ।

'ॐ प्रतिचक्षु विचक्ष्वेन्द्रस्व सोमजोभ्यः कृतं रक्षोभ्योबधमहल्पुते स्वाहा ।" इति पठेत् ।

२) ब्रह्मदण्डम् (विशेष अर्घदान द्वितीय)

ॐ ॐ श्रीँ सौँ सौँ ह्रौँ रवेदमा ॐ ॐ ह्रौँ असुरात् संरक्ष-रक्ष-हसोदयालीन् मर्दय-मर्दय, प्रज्वल-प्रज्वल, ॐ परोरजसे सावदोम्, ॐ धियो यो नः प्रचोदयात्, ॐ भर्गो देवस्य धीमहि, ॐ तत्सवितुर्वरेण्यं, ॐ भूर्भुवः सुवः, ॐ असुराणां वाहननाशार्थे ब्रह्मदण्डाऽभिमन्त्रितं द्वितीयाऽञ्जलिं प्रक्षिपामि श्रीसवितृनारायणायेदं नमः ।।२।।

(इत्यर्घ्यं दत्वा आत्मसंरक्षणार्थे पुनरर्घ्यादानयोग्यतासिध्यर्थे च प्रतिचक्ष्वीति हिरण्यगर्भं मन्त्रजपं करिष्ये इति प्रतिज्ञासंकल्पं विधाय) ॐ प्रतिचक्षु विचक्ष्वीन्द्रस्व सोमजोभ्यः कृतं रक्षोभ्योबधमहल्पुते स्वाहा। ॐ हिरण्यगर्भः समवर्ततग्रे भूतस्य जातः पतिरेकऽआसीत् "सदाधारपृथिवीम् द्यामुतेमाङ्कस्यै देवाय हविषाविधेम।" इति पठेत्।

३) अथ ब्रह्मशीर्षम् (विशेष अर्घदान तृतीय)

ॐ ॐ श्रीं सौं सौं ह्रौं रवेदमा ॐ ॐ ह्रौं असुरात् संरक्ष-रक्ष-हंसोदयालीन् मर्दय-मर्दय, प्रज्वल-प्रज्वल, ॐ सुवः, ॐ भुवः, ॐ भूः, ॐ ब्रह्म, ॐ अमृतं, ॐ रसः, ॐ ज्योतिः, ॐ आपः, ॐ अदः, ॐ असौ, ॐ रजसे, ॐ परः, ॐ प्रचोदयात्, ॐ नः, ॐ यः, ॐ धियः, ॐ धीमहि, ॐ देवस्य, ॐ भर्गो, ॐ वरेणियं, ॐ सवितुः, ॐ तत्, ॐ सत्यं, ॐ तपः, ॐ जनः, ॐ महः, ॐ सुवः, ॐ भुवः, ॐ भूः, ॐ असुरनाशार्थं ब्रह्मशीर्षाऽभिमन्त्रितं तृतीयाञ्जलिं प्रक्षिपामि-श्रीसवितृनारायणायेदं नमः। (इत्यर्घ्यं दत्त्वा आत्मसंरक्षणार्थे पुनः प्रायश्चित्तार्घ्यादानयोग्यतासिध्यर्थं च प्रतिचक्ष्वीति ब्रह्मयज्ञानमिति मन्त्रं च पठनमहं करिष्य इति प्रतिज्ञासंकल्पं कृत्वा) ॐ प्रतिचक्षु विचक्ष्वीन्द्रस्व सोमजोभ्यः कृतं रक्षोभ्योबध

करिष्य इति प्रतिज्ञासंकल्पं कृत्वा) ॐ प्रतिचक्षु विचक्ष्वीन्द्रस्व सोमजोभ्यः कृतं रक्षोभ्योबध

महल्पुते स्वाहा। ॐ ब्रह्मयज्ञानं प्रथमम्पुरस्ताद्विसीमतः सुरूचोव्वेनऽग्रावः सबुध्न्याऽउपमाऽअस्य विष्ठाः सतश्च योनिमसतश्चविवः इति पठेत्। ततो जलं गृहीत्वा देशकालचिन्तनान्ते मम अद्य कालातीतदोष–प्रायश्चित्तार्थं प्रायश्चित्तार्घ्यप्रदानमहं करिष्ये, इति प्रतिज्ञां कृत्वा।

४) कालातीतप्रायश्चित्तार्घ्यदानम् (विशेष अर्घदान चतुर्थ)

ॐ ॐ श्रीँ सौँ सौँ ह्रौँ रवेदमा ॐ ॐ ह्रीँ असुरात् संरक्ष–रक्ष हंसोदयालीन् मर्दय–मर्दय, प्रज्वल–प्रज्वल, ॐ वः सुवः र्भु भूः ह्म ब्र तं म् सो र ति ज्यो पो आ ॐ दों व सा से ज र रो प ॐ त् या द चो प्र नः यो यो धि हि म धी स्य व दे र्गो भ यं णि रे वं तु वि स त् त ॐ त्यां स, ॐ यः त ॐ नः ज, ॐ हः म, ॐ वः सु, ॐ वः भु, ॐ भूः, ॐ कालातीतक्रमदोषप्रायश्चित्तार्थं चतुर्थार्घ्यं प्रक्षिपामि श्रीसवितुनारायणायेदं नमः। इत्यर्घ्यं दत्त्वा।" ॐ प्रतिचक्षु विचक्ष्वीन्द्रस्व सोमजोभ्यः कृतं रक्षोभ्योबधः महल्पुते स्वाहा।" इति पठेत्। (अघोरास्त्रपाशुपतास्त्रादिमहाविद्याप्रयोगविधिः "त्रिपुरासारसिद्धान्तमा" दृष्टि दिनु)

अथाऽत्र तर्पणम्- ॐ भूः पुरुषं तर्पयामि, ॐ ऋग्वेदं तर्पयामि, ॐ सावित्रीं तर्पयामि, ॐ स्वः पुरुषं तर्पयामि, ॐ सरस्वतीं तर्पयामि। ॐ कामः सामवेदं तर्पयामि। इति तर्पयित्वाऽस्त्राणामङ्गन्यासं कुर्यात्।

अस्त्राणामङ्गन्यासः- ॐ ह्लः अस्त्राय फट्, ॐ ह्लौं नेत्रत्रयाय वौषट्, ॐ ह्लैं कवचाय हुम्, ॐ ह्लूँ शिखायै वषट्, ॐ ह्लीं शिरसे स्वाहा, ॐ ह्लाँ हृदयाय नमः।

अथ करन्यासः- ॐ ह्लः करतलकरपृष्ठाभ्यां फट्, ॐ ह्लौं कनिष्ठिकाभ्यां वौषट्, ॐ ह्लैं अनामिकाभ्यां हुम्, ॐ ह्लें मध्यमाभ्यां वषट्। ॐ ह्लीं तर्जनीभ्यां स्वाहा, ॐ ह्लां अङ्गुष्ठाभ्यां नमः, ॐ ह्लः ह्लौं ह्लैं ह्लूं ह्लीं ह्लां उत्तिष्ठ देवि गन्तव्यं पुनरागमनाय च हृदयस्था तु गायत्री हृदामुखविनिर्गता ॥१॥

गच्छ देवि सुरश्रेष्ठे गायत्री ब्रह्मस्वरूपिणी।
गृहाणार्घ्यं मया दत्तं दैत्यानां (शत्रूणां)[१] निधनं कुरु ॥२॥

---

१. यहाँ नामगोत्रोच्चारण करें।

तिस्रकोट्योऽर्धकोट्यस्तु मन्देहानामराक्षसाः ।
दुर्द्धर्षन्त्यो दुराचाराः सूर्यस्याऽभिमुखस्थिताः ।
तेन नश्यन्तु ते सर्वे वज्रीभूतेन वारिणा ॥३॥
ततः श्रौताऽऽचमनं कुर्यात् ।

श्रौताऽऽचमनम्

ॐ आमागन्नित्यस्य मन्त्रस्य परमेष्ठी ऋषिरापो देवता त्रिष्टुप्छन्द आचमने विनियोगः ।

"ॐ आमागन्यशसा सᳪसृजवर्चसा तं मा कुरु प्रियंप्रजानामधिपतिं पशूनामरिष्टन्तनूनाम् ।" अतः परं सर्वमपि अनुलोमेन दिग्बन्धनं कुर्यात् । यथा– ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् इति । ॐ ह्रां अङ्गुष्ठाभ्यां

टिप्पणी:– पृष्ठ ५६ को तर्पणमा "ॐ ऋग्वेदं तर्पयामि" पछि छुटेको ॐ गायत्रीं तर्पयामि, ॐ भुवः पुरुषं तर्पयामि, ॐ यजुर्वेदं तर्पयामि ।

नमः । ॐ ह्लीं तर्जनीभ्यां स्वाहा । ॐ ह्लूं मध्यमाभ्यां वषट् । ॐ ह्लैं अनामिकाभ्यां हुम् । ॐ ह्लौं कनिष्ठिकाभ्यां वौषट् । ॐ ह्लः करतलकरपृष्ठाभ्यां फट् । ॐ ह्लां हृदयाय नमः । ॐ ह्लीं शिरसे स्वाहा । ॐ ह्लूं शिखायै वषट् । ॐ ह्लैं कवचाय हुम् । ॐ ह्लौं नेत्रत्रयाय वौषट् । ॐ ह्लः अस्त्राय फट् इति ।

संहरणम् [आफूमा संस्थापित गर्ने]

ॐ अस्य श्रीब्रह्मास्त्र-ब्रह्मदण्ड-ब्रह्मशीर्षमन्त्राणां ब्रह्मा ऋषिर्गायत्री छन्दः परमात्मा देवता ऐं बीजम्, यँ शक्तिः, नीं कीलकम् । मम अस्त्रचतुष्टययोगसंहरणार्थे जपे विनियोगः । ॐ ब्रह्मऋषये नमः- शिरसि । ॐ गायत्रीच्छन्दसे नमः- मुखे । ॐ परमात्मा-देवतायै नमो- हृदये । ॐ ऐं बीजाय नमः- गुह्ये । ॐ यँ शक्तये नमः- पादयोः । ॐ नीं कीलकाय नमः- जान्वोः ।

ॐ अस्य श्रीअर्घ्यदानमन्त्रचतुष्टयस्य सावित्र्या भार्गव ऋषिरनुष्टुबादिनाना छन्दांसि सविता देवता तत्सवितुर्वरेण्यमिति बीजम् । भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् इति शक्तिः । ॐ परोरजसे सावदोम् ३ ॐ ॐ आपो ज्योती रसोऽमृतं ब्रह्म

भूर्भुवः स्वरोम् ३ इति- कीलकम् । मम गायत्रीप्रसादसिध्यर्थं अस्त्रोपसंहरणे जपे

भूर्भुवः सुवरोम् ३ इति- कीलकम् । मम गायत्रीप्रसादसिध्यर्थे अस्त्रोपसंहरणे जपे विनियोगः। ॐ सावित्र्या भार्गवऋषये नमः- शिरसि । ॐ अनुष्टुबादिनानाछन्दोभ्यो नमः- मुखे । ॐ सवितादेवतायै नमो- हृदये । ॐ तत्सवितुर्वरेण्यं बीजाय नमो- गुह्ये । ॐ भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् इति शक्तये नमः- पादयोः । ॐ परोरजसे सावदोम् ३ आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः सुवरोम् इति कीलकाय नमो- जान्वोः। ॐ अघोरास्त्राय शार्ङ्गाय नारसिंहाय सुदर्शनाय अस्त्रराजाय। ॐ भूर्भुवः सुवः ॐ ह्राँ तत्सवितुः ब्रह्मात्मतेजसे ह्राँ- अङ्गुष्ठाभ्यान्नमः । ॐ अघोरास्त्राय शार्ङ्गाय नारसिंहाय सुदर्शनाय अस्त्रराजाय । ॐ ह्रीँ वरेण्यं विष्ण्वात्मतेजसे ह्रीँ तर्जनीभ्यां स्वाहा । ॐ अघोरास्त्राय शार्ङ्गाय नारसिंहाय सुदर्शनाय अस्त्रराजाय ॐ ह्रूँ भर्गो देवस्य रुद्रात्मतेजसे ह्रूँ मध्यमाभ्यां वषट् । ॐ अघोरास्त्राय शार्ङ्गाय नारसिंहाय सुदर्शनाय अस्त्रराजाय ह्रैँ धीमहि सदाशिवात्मतेजसे ह्रैँ अनामिकाभ्यां हुम् । ॐ अघोरास्त्राय शार्ङ्गाय नारसिंहाय सुदर्शनाय अस्त्रराजाय । ॐ ह्रौँ धियो यो नः महासदाशिवात्मतेजसे ह्रौँ कनिष्ठिकाभ्यां वौषट् । ॐ अघोरास्त्राय शार्ङ्गाय नारसिंहाय सुदर्शनाय अस्त्रराजाय

ॐ ह्लः प्रचोदयात् सर्वात्मतेजसे ह्लः करतलकरपृष्ठाभ्यां फट् । ॐ अघोरास्त्राय शार्ङ्गाय नारसिंहाय सुदर्शनाय अस्त्रराजाय ॐ भूर्भुवः सुवः ॐ ह्लां तत्सवितुः ब्रह्मात्मतेजसे ह्लां हृदयाय नमः । ॐ अघोरास्त्राय शार्ङ्गाय नारसिंहाय सुदर्शनाय अस्त्रराजाय ॐ ह्लीं वरेण्यं विष्ण्वात्मतेजसे ह्लीं शिरसे स्वाहा । ॐ अघोरास्त्राय शार्ङ्गाय नारसिंहाय सुदर्शनाय अस्त्रराजाय ह्लूँ भर्गो देवस्य रुद्रात्मतेजसे ह्लूँ शिखायै वषट् । ॐ अघोरास्त्राय शार्ङ्गाय नारसिंहाय सुदर्शनाय अस्त्रराजाय ह्लैं धीमहि सदाशिवात्मतेजसे ह्लैं कवचाय हुम् । ॐ अघोरास्त्राय शार्ङ्गाय नारसिंहाय सुदर्शनाय अस्त्रराजाय ह्लौं धियो यो नः महासदाशिवात्मतेजसे ॐ ह्लौं नेत्रत्रयाय वौषट् । ॐ अघोरास्त्राय शार्ङ्गाय नारसिंहाय सुदर्शनाय अस्त्रराजाय ह्लः प्रचोदयात् सर्वात्मतेजसे ह्लः अस्त्राय फट् । इति दिग्बन्धः ।

अथ ध्यानम्

सर्वास्त्रादित्यहस्तं सुररिपुरुधिरं बोधमुद्राङ्कितञ्च
भूषारत्नोज्ज्वलाङ्गं द्विजकुलहृदये वासमादित्यबीजम् ।
मन्देहानामदैत्यग्रसनपटमहाघोरजिह्वाकरालं

भूषारत्नोज्ज्वलाङ्गं द्विजकुलहृदयं वासमादित्यबीजम् ।
मन्देहानामदैत्यग्रसनपटुमहाघोरजिह्वाकरालं
ध्यायेद् ब्रह्मास्त्रमाद्यं लयसमयमहावीतिहोत्रस्वरूपम् ।।१।।
सर्वास्त्राणाञ्च शक्त्या क्वणदरुणरणत्कारघोरैकपिण्डं
ब्रह्माण्डान्तर्द्विजानामवनिकृतमिदं क्रुद्धिशेषोग्रमूर्तिम् ।
जाज्ज्वल्योग्रं त्रिनेत्रं रविरुपजयति सादितं शस्त्रजालं
मालाक्षाम्भोजनाभ्यंबुजभुवनलयं चिन्तयेद् ब्रह्मदण्डम् ।।२।।
तेजः पुञ्जमयं प्रसन्नममलं ह्याध्यात्मकं योगिहृद्
ध्यायेद् भूसुर–भूषणं निरुपमं श्रेष्ठं त्रिमूर्त्यात्मकम् ।
नित्यं भास्करवाहवैरिपिशितं सुक्यूवपूर्णार्थद-
मस्त्रं ब्रह्मशिरोऽभिधानममलं ध्यायेद्धि कर्मादितः ।।३।।

अस्त्रोपसंहरणम् [आकूमा संस्थापित गर्ने]

ततः प्रतिज्ञां कुर्यात्– "सविता नारायणः प्रेरणीया सविता नारायणप्रीत्यर्थं गायत्रीसन्मुखीकरणार्थं च प्रायश्चिताध्यंप्रदानमन्त्रादिब्रह्मास्त्रान्तमन्त्रचतुष्टयमनुलोमो-

च्चारणपूर्वकं, अस्त्रोपसंहरणमहं करिष्ये, तत ऊर्ध्वबाहुः सन्- ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः ॐ ॐ मादखे ह्लौं सौं सौं श्रीं ॐ ॐ ह्लौं, असुरात् संरक्ष-रक्ष हंसोदयालीन्, मर्दय मर्दय प्रज्वल-प्रज्वल ॐ भूः, ॐ भुवः, ॐ सुवः, ॐ महः, ॐ जनः, ॐ तपः, ॐ सत्यं, ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् । ॐ परोरजसे सावदोम् ३ ।

ॐ आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः सुवरोम् ३ ॐ ॐ मादखे ह्लौं सौं सौं श्रीं ॐ ॐ ह्लौं असुरात् संरक्ष-रक्ष, हंसोदयालीन् मर्दय-मर्दय, प्रज्वल-प्रज्वल ॐ भूः, ॐ भुवः, ॐ सुवः, ॐ महः, ॐ जनः, ॐ तपः, ॐ सत्यम्, ॐ तत्, ॐ सवितुः, ॐ वरेणियं, ॐ भर्गो, ॐ देवस्य, ॐ धीमहि, ॐ धियो, ॐ यो, ॐ नः, ॐ प्रचोदयात्, ॐ परः, ॐ रजसे, ॐ असौ, ॐ अदः, ॐ आप, ॐ ज्योतिः, ॐ रसः, ॐ अमृतं, ॐ ब्रह्म, ॐ भूः, ॐ भुवः, ॐ सुवः, ॐ ॐ ॐ मादखे ह्लौं सौं सौं श्रीं, ॐ ॐ ह्लौं असुरात् संरक्ष-रक्ष हंसो दयालीन् मर्दय-मर्दय प्रज्वल-प्रज्वल, ॐ भूर्भुवः सुवः, ॐ तत्सवितुर्वरेणियं, ॐ भर्गो देवस्य धीमहि, ॐ धियो यो नः प्रचोदयात्, ॐ परोरजसे सावदोम् ३, ॐ ॐ मादखे ह्लौं सौं सौं श्रीं, ॐ ॐ ह्लौं असुरात् संरक्ष-रक्ष हंसोदयालीन् मर्दय-मर्दय प्रज्वल-प्रज्वल, ॐ भूर्भुवः सुवः, ॐ तत्सवितुर्वरेणियं, ॐ भर्गो देवस्य धीमहि, ॐ धियो यो नः प्रचोदयात् ।

इति ब्रह्मास्त्रेण हृद्गतमात्मानं नेत्रद्वारा हृदि आवाह्य पाणिना हृदयं स्पृष्ट्वा तर्जनी-मध्यमाऽङ्गुलिभ्यां नेत्रयोरुदकस्पर्शनं कुर्यात् । ततश्च सूर्योपस्थानं कुर्यात् ।

सूर्योपस्थानम् [ऊर्ध्वबाहु भूत्वैव]

ॐ उद्वयमित्यस्य हिरण्यस्तूपऋषिरनुष्टुप्छन्दः सूर्योदेवता सूर्योपस्थाने विनियोगः ॐ उदुत्यमित्यस्य प्रस्कण्व ऋषिर्गायत्रीछन्दः सूर्यो देवता सूर्योपस्थाने विनियोगः ॐ चित्रमित्यस्य कुत्साङ्गिरसः ऋषिस्त्रिष्टुप्छन्दः सूर्योदेवता तच्चक्षुरित्यस्य दध्यङ्ङाथर्वण ऋषिः । अक्षरातीतपुरउष्णिक्छन्दः सूर्योदेवता सूर्योपस्थाने विनियोगः ।

ॐ उद्वयन्तमसस्परिस्वः पश्यन्तऽउत्तरम् । देवन्देवत्रा सूर्यमगन्मज्ज्योतिरुत्तमम् । ॐ उदुत्यञ्जातवेदसन्देवं वहन्ति केतवः दृशे विश्वायसूर्य्यम् । ॐ चित्रन्देवानामुदगादनी-कञ्चक्षुर्मित्रस्य वरुणस्याग्नेः । आ प्रा द्यावा पृथिवीऽअन्तरिक्ष᳘ सूर्य्यऽआत्मा जगतस्तस्थु-षश्च । ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः शतञ्जीवेम शरदः शत᳘ शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः
शृणुयाम शरदः शतम्भूयश्च शरदः शतात् ।

गायत्रीशापविमोचनम्

ॐ अस्य श्रीब्रह्मशापविमोचनमन्त्रस्य ब्रह्मा ऋषिः गायत्री छन्दः। भुक्तिमुक्तिप्रदा ब्रह्मशापविमोचनी गायत्री शक्तिर्देवता ब्रह्मशापविमोचने विनियोगः। ॐ गायत्रीं ब्रह्मेत्युपासीत यद्रूपंब्रह्मविदो विदुस्तां पश्यन्ति धीराः सुमनसा वाचामग्रतः। ॐ वेदात्मनाय विद्महे हिरण्यगर्भाय धीमहि तन्नो ब्रह्म प्रचोदयात्। ॐ देवि गायत्री त्वं ब्रह्मशापाद्विमुक्ता भव ३ ॥१॥

ॐ अस्य श्रीवशिष्ठशापविमोचनमन्त्रस्य निग्रहाऽनुग्रहकर्ता वशिष्ठ ऋषिः, वशिष्ठाऽनुगृहीता गायत्री शक्तिर्देवता विश्वोद्भवा गायत्री छन्दः वशिष्ठशापविमोचनार्थं जपे विनियोगः।

श्वासं नियम्य–

ॐ सोऽहमर्कमयं ज्योतिरहं शिवः, आत्मज्योतिरहं शुक्रः सर्वज्योतिरसोऽस्म्यहम्। इत्युक्त्वा योनिमुद्रां प्रदर्श्य गायत्रीत्रयं जपित्वा, ॐ देवि गायत्रि त्वं वशिष्ठशापाद्विमुक्ता भव ३ ॥२॥

ॐ अस्य श्रीविश्वामित्रशापविमोचनमन्त्रस्य नूतनसृष्टिकर्ता विश्वामित्र ऋषिः, विश्वामित्राऽनुगृहीता गायत्री शक्तिर्देवता वाग्देहा गायत्री छन्दः, विश्वामित्रशापविमोचनार्थं जपे विनियोगः ।

ॐ गायत्रीं भजाम्यग्निमुखीं विश्वगर्भां यदुद्भवा देवाश्चक्रिरे विश्वसृष्टिं तां कल्याणीमिष्टकरीं प्रपद्ये । यन्मुखान्निःसृतोऽखिलवेदगर्भः । ॐ देवि गायत्रि त्वं विश्वामित्रशापाद्विमुक्ता भव ३ ।।३।।

ॐ अस्य श्रीवरुणशापविमोचनमन्त्रस्य पायुर्भारद्वाज ऋषिः त्रिष्टुप्छन्दः । वरुणानुगृहीता गायत्री शक्तिर्देवता वरुणशापविमोचनार्थे जपे विनियोगः । ॐ तिग्मायुधौ तिग्महेती सुवेशौ सोमारुद्राविव सुमृलतं नः । प्रनो मुञ्चतं वरुणस्य पाशाद्गोपायतं नः सुमनस्य माना । ॐ धाम्नो धाम्नो राजन्नितो वरुण नो मुञ्च । ॐ देवि भगवति गायत्रि त्वं वरुणशापाद्विमुक्ता भव ।

शापयुक्ता तु गायत्री सफला न कदाचन ।
शापादुत्तारिता सा तु भुक्ति-मुक्ति-फलप्रदा ।।

प्रार्थना— ॐ अहो ! देवि ! महादेवि ! सन्ध्ये ! विद्ये ! सरस्वती ।
अजरे ! अमरे ! चैव ब्रह्मयोनिर्नमोऽस्तु ते ॥१॥

देवि ! गायत्रि ! त्वं ब्रह्मशापाद्विमुक्ता भव, वशिष्ठशापद्विमुक्ता भव, विश्वामित्रशापाद्विमुक्ता भव ॥३॥ (इति त्रिवारं पठेत्)

ततो हस्ते जलं गृहीत्वा गायत्र्याऽऽत्मानं प्रदक्षिणां कुर्यात् । ततः पुनः जलं गृहीत्वा "ॐ रक्षाꣳसि ह वा पुरोऽनुवाके, तप्नापोग्रमधिष्ठन्ततान् प्रजापतिर्वरेण्यो पावनं तैस्तत्रानिवरमवृणीतोदित्यो नो योध्या इति तान् प्रजापतिरब्रवी चोदध्वमिति यस्मादुत्तिष्ठन्तमुहातानि रक्षाꣳस्यादित्यं योधयन्ति पावकस्तमन्वगास्तानि ह वा एतानि रक्षाꣳसि गायत्र्याऽभिमन्त्रित आप ऊर्ध्वं प्रक्षिपति ता आपो वज्रीभूत्वा तानि रक्षाꣳसि मन्देहारिणो द्वीपे प्रक्षिपन्ति तत्प्रदक्षिणां प्रक्रमन्ति तेन पाप्मानमवधुन्वन्त्युद्यन्तयस्तोद्यन्तमादित्य मविध्यायत् कुर्वन् ब्राह्मणो विद्वान् सकलभद्रमश्नुते, सकलभद्रमश्नुते । असौ आदित्यो ब्रह्मेति ब्रह्मैव सन् ब्रह्माप्येति य एवं ॐ यदद्यकच्च वृत्रहन्नुदगाऽअभिसूर्य्यं । सर्व्वन्तदिन्द्र ते वशे । ॐ असावादित्यो ब्रह्म" इति पठित्वा जलं भूम्याम् क्षिपेत् ।

से स्वते । ॐ प्रसावादित्यो ब्रह्म" इति पठित्वा जलं भूम्याम् क्षिपेत् ।

[श्रौताऽऽचमनम् ३]

आसने, उपविश्य द्विराचमनं कुर्यात् तत्र मन्त्रः, ॐ मामागन्निति मन्त्रस्य परमेष्ठी ऋषिः, आपो देवता त्रिष्टुप्छन्दः, आचमने विनियोगः । ॐ मामागन् यशसा स ँ सृज वर्चसा तं माकुरुष्प्रियं प्रजानामधिपतिं पशूनामरिष्टन्तनूनाम् ।

अथ हृदयादिन्यासः

ॐ हृदयाय नमः [इति दक्षिणहस्तस्य मध्यभागेन हृदयं स्पृशेत्]

ॐ भूः शिरसे स्वाहा [इति दक्षिणहस्तस्य पञ्चभिरङ्गुलाग्रभागैः, ललाटं स्पृशेत्]

ॐ भुवः शिखायै वषट् [इति दक्षिणहस्तस्याऽङ्गुष्ठेन शिखां स्पृशेत्]

ॐ स्वः कवचाय हुम् [इति कनिष्ठिकामूलभागाभ्यां कवचं स्पृशेत्] ॐ भूर्भुवः स्वः नेत्रत्रयाय वौषट् । [इत्यङ्गुष्ठाऽनामिकाभ्यां नेत्रे संस्पृशेत्, मध्यमया (ललाटमध्यभागस्थं) तृतीयं नेत्रञ्च स्पृशेत् । ॐ भूर्भुवः स्वः अस्त्राय फट् [इति वामहस्तमध्यभागे दक्षिणहस्तस्याऽनामिकामध्यमातर्जनीभिस्तालत्रयं कुर्यात् ।]

रक्षामन्त्रः [मन्त्रोक्तानि प्रत्यङ्गानि स्पृशेत्]

तत्पदं पातु मे पादौ जंघे मे सवितुः पदम् ।
वरेण्यं कटिदेशन्तु नाभिं भर्गस्तथैव च ॥१॥
देवस्य मे तु हृदयं धीमहीतिगलं तथा ।
धियो मे पातु जिह्वायां यः पदं पातु लोचने ॥२॥
ललाटं नः पदं पातु मूर्द्धानं मे प्रचोदयात् ।

विनियोगः- ॐ कारस्य परब्रह्मऋषिः परमात्मादेवता गायत्रीछन्दः ॐ त्रिव्याहृतीनां प्रजापतिर्ऋषिरग्नि-वायु-सूर्या देवताः गायत्र्युष्णिगनुष्टुभश्छन्दांसि, ॐ गायत्र्या विश्वामित्रऋषिः, सवितादेवता गायत्रीछन्दः, वायव्यं बीजं, चतुर्थं शक्तिः पञ्चविंशतिव्यञ्जनानि कीलकम् । चतुर्थं पदं, अग्निमुखम्, ब्रह्मशिरो विष्णुर्हृदयः रुद्रः कवचं परमात्मा शरीरम् श्वेतवर्णा सांख्यायनगोत्रा चतुर्विंशत्यक्षरा षट्स्वराः सरस्वतीजिह्वा पिङ्गाक्षी त्रिपदा गायत्री, सर्वपापक्षयार्थे जपे विनियोगः ।

ध्यानम्- ॐ भूर्भुवः स्वः ।

ध्यानम्- ॐ भूर्भुवः स्वः ।

श्वेतवर्णा समुद्दिष्टा कौशेयवसना तथा ।
श्वेतैर्विलेपनैः पुष्पैरलङ्कारैश्च भूषिता ॥१॥
आदित्यमण्डलस्था च ब्रह्मलोकगताऽथवा ।
अक्षसूत्रधरा देवी पद्मासनगता शुभा ॥२॥

विनियोगः- ॐ तेजोसीति देवाऋषयः शुक्रं दैवत गायत्रीछन्दो गायत्र्याऽऽवाहने विनियोगः ।

व्यापकाञ्जलिना-

ॐ तेजोसि शुक्रमस्य मृतमसि धामनामासि प्रियं देवानामनाधृष्टं देव-यजनमसि ।

विनियोगः- ॐ तुरीयस्य पदस्य विमल ऋषिः परमात्मा देवता गायत्री छन्दः गायत्र्युपस्थाने विनियोगः । ॐ गायत्र्येस्यैकपदी द्विपदी त्रिपदी चतुष्पद्यपदसि नहि पद्यसे नमस्ते तुरीयाय दर्शतापपदाय परोरजसे सामदोम् । इत्युपस्थापनं कृत्वा पुनः गायत्री-विनियोगं पठेत् ।

ॐ प्रणवस्य परब्रह्म ऋषिः, परमात्मा देवता, गायत्री छन्दः, ॐ त्रिव्याहृतीनां प्रजापतिः ऋषिः, अग्नि–वायु–सूर्या देवता । गायत्र्युष्णिगनुष्टुप्त्रयच्छन्दांसि, ॐ गायत्र्या विश्वामित्र ऋषिः सविता देवता, गायत्री छन्दः, वायव्यं बीजं, चतुर्थं शक्तिः, पञ्चविंशति व्यञ्जनानि, कीलकं चतुर्थं पदम्, अग्निमुखं ब्रह्मशिरो विष्णुः हृदयं रुद्रकवचं परमात्मा शरीरं, श्वेतवर्णा सांख्यायनगोत्रा षट्स्वराः सरस्वतीजिह्वा पिङ्गाक्षी त्रिपदा गायत्री सर्वपापक्षयार्थे जपे विनियोगः ।

ध्यानान्ते चतुर्विंशति मुद्राः प्रदर्शनम् ।

अथ प्रातःकालीनं ध्यानम्

बालां विद्यां तु गायत्रीं लोहितां चतुराननाम् ।
रक्ताम्बरद्वयोपेतामक्षसूत्रकरां तथा ॥१॥
कमण्डलुधरां देवीं हंसवाहनसंस्थिताम् ।
ब्रह्माणीं ब्रह्मदैवत्यां ब्रह्मलोकनिवासिनीम् ।
मन्त्रेणाऽऽवाहयेद्देवीमायान्तीं सूर्यमण्डलात् ॥२॥

मन्त्रेणाऽऽवाहयेद्देवीमायान्तीं सूर्यमण्डलात् ॥२॥

मध्याह्नकालिकं गायत्रीध्यानम्

(कार्यवशादनवकाशपुरुषः प्रातरेव तन्त्रेण जपं कुर्यात्)

मध्याह्ने विष्णुरूपाञ्च तार्क्ष्यस्थां पीतवाससाम् ।
युवतीञ्च यजुर्वेदां सूर्यमण्डलसंस्थिताम् ॥१॥

सायंकालिकं गायत्रीध्यानम्

सायाह्ने शिवरूपाञ्च वृद्धां वृषभवाहिनीम् ।
सूर्यमण्डलमध्यस्थां सामवेदसमायुताम् ॥१॥

शुद्धं गायत्रीध्यानम् (गा. पं.)

यद्देवैः सुरपूजितं परतरं सामर्थ्यतारात्मकं ।
पुन्नागाम्बुजपुष्पनागबकुलैः केशैः शुकैरर्चितम् ॥
नित्यं ध्यानसमस्तदीप्तिकरणं कालाग्निरुद्दीपनं ।
तत्संहारकरं नमामि सततं पातालसंस्थं मुखम् ॥ [षष्ठाम्नाये]

जपादौ चतुर्विंशतिमुद्राप्रदर्शनम्

सुमुखं सम्पुटञ्चैव विततं विस्तृतं तथा ।
द्विमुखं त्रिमुखं चैव चतुःपञ्चमुखं तथा ॥१॥
षण्मुखाऽधोमुखञ्चैव व्यापकाञ्जलिकं तथा ।
शकटं यमपाशञ्च ग्रन्थितं चोन्मुखोन्मुखम् ॥२॥
प्रलम्बं मुष्टिकञ्चैव मत्स्यः कूर्मो वराहकम् ।
सिंहक्रान्तं महाक्रान्तं मुद्गरं पल्लवं तथा ।
एता मुद्राश्चतुर्विंशज्जपादौ परिकीर्तिताः ॥३॥

हस्ते मालां गृहीत्वा

मां माले महामाये सर्वशक्तिस्वरूपिणी ।
चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव ॥१॥

इति शिरसाऽभिवाद्याऽर्कमीक्षमाणो मन्त्रार्थं स्मरन्, अविक्षतचित्रः स्फटिक-पद्माक्ष-रुद्राक्ष-पुत्रजीवक-कुशग्रन्थि-मालाभिर्हस्तपर्वैर्वा प्रणवव्याहृतिपूर्णां गायत्रीं जपेत्

विप्रपुङ्गवो ब्राह्मणः पञ्चप्रणवात्मिकां गायत्रीं जपेत् । यथा– (मन्त्रस्वरूपम्)

ॐ भूर्भुवः स्वः, ॐ तत्सवितुर्वरेण्यं, ॐ भर्गो देवस्य धीमहि, ॐ धियो यो नः प्रचोदयात्, ॐ नमः । इति (ब्रह्महत्यादिकनाशिका गायत्री), ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्, ॐ नमः । इति अथवा ॐ भूर्भुवः स्वः श्रीं तत्सवितुर्वरेण्यं ह्रीं भर्गो देवस्य धीमहि क्लीं धियो यो नः प्रचोदयात्, ॐ नमः । (भुवनेश्याः)

जपान्ते "ॐ सिद्ध्यै नमः" इति मालां प्रणमेत् ।

त्वं माले सर्वदेवानां प्रीतिदा शुभदा भव ।
शिवं कुरुष्व मे भद्रे यशो वीर्यञ्च वर्द्धय ॥१॥ इति पठेत् ।

ततः श्रौताऽऽचमनम्

ॐ आमागन्निति परमेष्ठी ऋषिरापो देवता त्रिष्टुप्छन्दः आचमने विनियोगः । ॐ आमागन् यशसा सꣳसृज वर्चसा तं मा कुरुप्प्रियं प्रजानामधिपतिं पशूनामरिष्टन्तनूनाम् । इति तूष्णीं द्विराचम्य करादिषडङ्गन्यासं कुर्यात् ।

ॐ भूः अङ्गुष्ठाभ्यान्नमः, ॐ भुवः तर्जनीभ्यां स्वाहा, ॐ स्वः मध्यमाभ्यां वषट्, ॐ तत्सवितुर्वरेणियं अनामिकाभ्यां हुम्, ॐ भर्गो देवस्य धीमहि कनिष्ठिकाभ्यां वौषट्, ॐ धियो यो नः प्रचोदयात्– करतलकरपृष्ठाभ्यां फट् । ॐ भूः हृदयाय नमः, ॐ भुवः शिरसे स्वाहा, ॐ स्वः शिखायै वषट्, ॐ तत्सवितुर्वरेणियं कवचाय हुम्, ॐ भर्गो देवस्य धीमहि नेत्रत्रयाय वौषट् । ॐ धियो यो नः प्रचोदयात् अस्त्राय फट् । इति पूर्ववत् । अत्राऽपि पूर्ववन्मानसोपचारपूजां विधायैव जपं निवेदयेत् ।

अथ जपनिवेदनम्

ॐ देवागातुरित्यस्य मनसस्पतऋषिर्वातोदेवता विराट्छन्दः जपनिवेदने विनियोगः । ॐ देवागातु विदोगातुं वित्वागातुमित । मनसस्पतऽइमन्देवयज्ञ ँ स्वाहा वातेधाः ।

ॐ गुह्यातिगुह्यगोप्त्री त्वं गृहाणाऽस्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवि ! त्वत्प्रसादात्सुरेश्वरि ॥१॥

इति मन्त्रेण गायत्र्या वामकरे जपं निवेदयेत् । जपान्तेऽष्टौ मुद्राः ।

सुरभिर्ज्ञानवैराग्यं योनिः शङ्खोऽथ पङ्कजम् ।
लिङ्गं निर्वाणकं चैव जपान्तेऽष्टौ प्रदर्शयेत् ॥१॥

अथ विश्वामित्रसंहितोक्तं गायत्रीकवचम्

ॐ अस्य श्रीगायत्रीकवचस्य ब्रह्माऋषिर्गायत्रीछन्दो गायत्री देवता, ॐ भूः बीजम्, ॐ भुवः शक्तिः, ॐ स्वः कीलकम्, गायत्रीप्रीत्यर्थे जपे विनियोगः ।

अथ ध्यानम्

पञ्चवक्त्रां दशभुजां सूर्यकोटिसमप्रभाम् ।
सावित्रीं ब्रह्मवरदां चन्द्रकोटिसुशीतलाम् ॥१॥
त्रिनेत्रां सितवस्त्रां च मुक्ताहारविराजिताम् ।
वराभयाङ्कुशकशा हेमपात्राक्षमालिकाः ॥२॥
शङ्खचक्राब्जयुगलं कराभ्यां दधतीं पराम् ।
सितपङ्कजसंस्थां च हंसारूढां सुखस्मिताम् ।
ध्यात्वैवं मानसाम्भोजे गायत्रीकवचं पठेत् ॥४॥

ब्रह्मोवाच ॥५॥

विश्वामित्र ! महाप्राज्ञ ! गायत्रीकवचं श्रृण् ।
यस्य विज्ञातमात्रेण त्रैलोक्यं वशयेत् क्षणात् ॥६॥
सावित्री मे शिरः पातु शिखायामसमृतेश्वरी ।
ललाटं ब्रह्मदैवत्या भ्रुवौ मे पातु वैष्णवी ॥७॥
कर्णौ मे पातु रुद्राणी सूर्यासावित्रिका(बतु)म्बिका ।
गायत्री वदनं पातु शारदा दशनच्छदौ ॥८॥
द्विजान् यज्ञप्रिया पातु रसनायां सरस्वती ।
सांख्यायनी नासिकां मे कपोलौ चन्द्रहासिनी ॥९॥
चिबुकं वेदगर्भा च कण्ठं पात्वघनाशिनी ।
स्तनौ मे पातु इन्द्राणी हृदयं ब्रह्मवादिनी ॥१०॥
उदरं विश्वभोक्त्री च नाभौ पातु सुरप्रिया ।
जघनं नारसिंही च पृष्ठं ब्रह्माण्डधारिणी ॥११॥

पार्श्वौ मे पातु पद्माक्षी गुह्यं गोगोप्त्रिकाऽवतु ।
ऊर्वोरोङ्काररूपा च जान्वोः सन्ध्यात्मिकाऽवतु ॥१२॥

जङ्घयोः पातु अक्षोभ्या गुल्फयो ब्रंह्मशीर्षका ।
सूर्या पदद्वयं पातु चन्द्रा पादाङ्गुलीषु च ॥१३॥

सर्वाङ्गं वेदजननी पातु मे सर्वदाऽनघा ।
इत्येतत् कवचं ब्रह्मन् ! गायत्र्याः सर्वपावनम् ।
पुण्यं पवित्रं पापघ्नं सर्वरोगनिवारणम् ॥१४॥

त्रिसन्ध्यं यः पठेद्विद्वान् सर्वान् कामानवाप्नुयात् ।
सर्वशास्त्रार्थतत्त्वज्ञः स भवेद्वेदवित्तमः ॥१५॥

सर्वयज्ञफलं प्राप्य ब्रह्मान्ते समवाप्नुयात् ।
प्राप्नोति जपमात्रेण पुरुषार्थांश्चतुर्विधान् ॥१६॥

इति विश्वामित्रसंहितोक्तं कवचं सम्पूर्णम् ।

अथ गायत्रीतर्पणम्

ॐ गायत्र्या विश्वामित्र ऋषिः सविता देवता गायत्री छन्दः, गायत्रीतर्पणे विनियोगः। ॐ भूः ऋग्वेदपुरुषं तर्पयामि, ॐ भुवः यजुर्वेदपुरुषं तर्पयामि, ॐ स्वः सामवेदपुरुषं तर्पयामि, ॐ महः अथर्ववेदपुरुषं तर्पयामि, ॐ जनः इतिहासपुराणपुरुषं तर्पयामि, ॐ तपः सर्वागमपुरुषं तर्पयामि, ॐ सत्यं सत्यलोकपुरुषं तर्पयामि, ॐ भूः भूर्लोकपुरुषं तर्पयामि, ॐ भुवः भुवर्लोकपुरुषं तर्पयामि, ॐ स्वः स्वर्लोकपुरुषं तर्पयामि, ॐ भूः एकपदां गायत्रीं तर्पयामि, ॐ भुवः द्विपदां गायत्रीं तर्पयामि, ॐ स्वः त्रिपदां गायत्रीं तर्पयामि, ॐ भूर्भुवः स्वः चतुष्पदां गायत्रीं तर्पयामि, ॐ उषसीं तर्पयामि, ॐ गायत्रीं तर्पयामि, ॐ सावित्रीं तर्पयामि, ॐ सरस्वतीं तर्पयामि, ॐ वेदमातरं तर्पयामि, ॐ पृथिवीं तर्पयामि, ॐ अजां तर्पयामि, ॐ कौशिकीं तर्पयामि, ॐ साङ्कृतीं तर्पयामि, ॐ सर्वजितां तर्पयामि, ॐ शतमूर्तिम् तर्पयामि, ॐ सहस्रमूर्तिम् तर्पयामि, ॐ अनन्तमूर्तिम् तर्पयामि, इति तर्पयित्वोत्थाय बद्धाञ्जलिना प्रदक्षिणां कुर्यात्।

ॐ विश्वतश्चक्षुरिति मन्त्रस्य विश्वकर्माभौवन ऋषिर्विश्वकर्मा देवता त्रिष्टुप्छन्दः

ॐ विश्वतश्चक्षुरिति मन्त्रस्य विश्वकर्माभौवन ऋषिर्विश्वकर्मा देवता त्रिष्टुप्छन्दः सूर्यप्रदक्षिणायां विनियोगः ।

ॐ विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्, सम्बाहुभ्यान्धमति सम्पतत्रैर्द्यावा भूमीजनयन्देव एकः । अथ नमस्कारः, बाहुभ्यां कर्णौ स्पृष्ट्वा ।

ॐ पूर्वोच्चारितसङ्कल्पसिद्धिरस्तु । अद्येह कौडिण्यगोत्रोत्पन्नः कौडिण्य–वासिष्ठ–मैत्रावरुणीति त्रिप्रवरो माध्यन्दिनीयशाखान्तर्गतशुक्लयजुर्वेदाऽध्यायी लोकनाथशर्माऽहं, सांख्यायनगोत्रे ! ब्रह्मरूपधारिणि ! भो ! गायत्रि ! त्वामभिवादये । भो ! वैश्वानर ! त्वामभिवादये । भो याज्ञवल्क्य ! त्वामभिवादये । भो ईश्वर ! त्वामभिवादये । भो सूर्याचन्द्रमसौ ! युवामभिवादये ।

"ॐ गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुरेकः परं ब्रह्म तस्मै श्रीगुरवे नमः ॥ सर्वेभ्यो गुरुभ्यो नमः ।"

अथ विसर्जनम्

ॐ उत्तरे शिखरे जाता भूम्यां पर्वतमूर्धनि ।
गायत्रीच्छन्दसां मातर्गच्छ देवि ! यथासुखम् ॥१॥

नमस्ते देवि गायत्रि ! सावित्रि ! त्रिपदेऽक्षरे ।
अजरे ! अमरे ! मातस्त्राहि मां भवसागरात् ॥२॥
कर्मणा मनसा वाचा गायत्रि ! त्वं गतिर्मम ।
अन्तश्चारेण भूतानां द्रष्ट्री त्वं परमेश्वरि ! ॥३॥
हीनोऽपि भक्तिवर्णैश्च व्यञ्जनैश्च स्वरैस्तथा ।
जपो मे क्षम्यतां देवि ! प्रसादं कुरु किङ्करे ॥४॥
अज्ञानाद्विस्मृतेर्भ्रान्त्या यन्न्यूनमधिकं कृतम् ।
तत्सर्वं पूर्णतां यान्तु त्वत्प्रसादात् सुरेश्वरि ॥५॥
मन्त्रहीनं क्रियाहीनं भक्तिहीनञ्च यन्मम ।
तत्सर्वं क्षम्यतां देवि ! प्रसीद परमेश्वरि ॥६॥

अथ शिखामोक्षणम्

ॐ ब्रह्मपाशसहस्रेण शिवशूलशतेन च ।
विष्णुचक्रसहस्रेण शिखामुक्तिं करोम्यहम् ॥

अथ सन्ध्याभूमृत्तिकावन्दनम्-

ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् स्वः भुवः भूः ॐ ३ जपित्वा तत्रत्यां मृत्तिकां गृहीत्वा स्वललाटे तिलकं कुर्यात् । अञ्जलिं बद्ध्वा- "ॐ स्तुता मया वरदा वेदमाता प्रचोदयन्ती पावमानी द्विजानाम् । आयुः प्राणान् प्रजाः पशून् कीर्तिं द्रविणं ब्रह्मवर्चसं मह्यं दत्त्वा व्रजत ब्रह्मलोकम् ।" हस्ते जलं गृहीत्वा कर्म समर्पणम्- ॐ अनेन प्रातःसन्ध्याङ्गभूतेन गायत्रीमन्त्रजपाख्येन कर्मणा ब्रह्मस्वरूपी सवितृ-नारायणः प्रीयताम्, न मम । ॐ तत्सत् ब्रह्मार्पणमस्तु । ततो दिग्भ्यो देवेभ्यः प्रणमेत् ।

ॐ प्राच्यै दिशे नमः- इन्द्राय नमः, ॐ आग्नेयदिशे- नमः, अग्नये नमः ।
ॐ दक्षिणायै दिशे नमः- यमाय नमः, ॐ नैर्ऋत्यै दिशे नमः- निर्ऋतये नमः ।
ॐ प्रतीच्यै दिशे नमः- वरुणाय नमः, ॐ वायव्यै दिशे नमः- वायवे नमः ।
ॐ उदीच्यै दिशे नमः- कुबेराय नमः, ॐ ऐशान्यै दिशे नमः- ईशानाय नमः ।
ॐ ऊर्ध्वायै दिशे नमः- ब्रह्मणे नमः, ॐ अधोदिशे नमः- अनन्ताय नमः ।
आसनाऽधो वर्तमानां मृत्तिकां गृहीत्वा जलेनाऽऽलोड्य ललाटे धारयेत् ।

अथ वेददीक्षामन्त्रप्रयोगविधिः [दीक्षितानां कृत एव]

ॐ अस्य श्रीवेदमन्त्रस्य ॐकारस्य ब्रह्मा ऋषिर्गायत्रीच्छन्दः प्रजापतिर्देवता ॐ हिरण्मयेति मन्त्रस्य परब्रह्म ऋषिर्देवी गायत्रीच्छन्दः परमात्मा देवता वेदपुरुषप्रीतये यथाशक्तिसंख्याक वेददीक्षामन्त्रजपमहं करिष्ये ।

अथ न्यासः

ॐ हिरण्मयेन पात्रेण– अङ्गुष्ठाभ्यां नमः ।

ॐ सत्यस्यापिहितं मुखम्– तर्जनीभ्यां स्वाहा ।

ॐ यो सावादित्येपुरुषः– मध्यमाभ्यां वषट् ।

ॐ सो सावहम्– अनामिकाभ्यां हुम् ।

ॐ खम्ब्रह्म– कनिष्ठिकाभ्यां वौषट् ।

ॐ तत्त्वमसीयब्रह्म– करतलकरपृष्ठाभ्यां फट् ।

ॐ तत्त्वमसीयब्रह्म- करतलकरपृष्ठाभ्यां फट् ।

हृदयादिन्यासः

ॐ हिरण्मयेन पात्रेण- हृदयाय नमः ।

ॐ सत्यस्यापिहितं मुखम्- शिरसे स्वाहा ।

ॐ यो सावादित्येपुरुषः- शिखायै वषट् ।

ॐ सोसावहम्- कवचाय हुम् ।

ॐ खम्ब्रह्म- नेत्रत्रयाय वौषट् ।

ॐ तत्त्वमसीयब्रह्म- अस्त्राय फट् ।

ॐ अयमात्मा ब्रह्म- इति सर्वाङ्गेषु स्पृशेत् ।

ॐ ओङ्कारस्य ब्रह्मा ऋषिर्गायत्रीच्छन्दः प्रजापतिर्देवता ॐ हिरण्मयेति मन्त्रस्य परब्रह्म ऋषिर्देवी गायत्रीछन्दः परमात्मा देवता वेदपुरुषप्रीतये यथाशक्तिसंख्याकवेदमन्त्रजपे विनियोगः ।

आचमनम्

ॐ ऋग्वेदाय नमः, ॐ यजुर्वेदाय नमः, ॐ सामवेदाय नमः, इत्याचम्य विद्वान्

ॐ अथर्ववेदाय नमः- इति हस्तं प्रक्षालयेत् ।

ॐ अग्ने ! नय सुपथा रायेऽअस्मान्विश्वानि देवव्वयुनानिविद्वान् । युयोद्ध्यस्मज्जुहुराण मेनो भूयिष्ठान्ते नमऽउर्क्तिंव्विधेम ॥१॥ ॐ हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् । योऽसावादित्ये पुरुषः सोसावहम् । ॐ खम्ब्रह्म ३॥ ॐ तत्त्वमसीयब्रह्म ३॥ ॐ अयमात्माब्रह्म ३॥ ॐ सर्वं ँ ह वा इदं ब्रह्म ३॥ ॐ ब्रह्मज्ञानं ब्रह्म ३॥ ॐ सर्वं खल्विदमेवेदं नान्यदस्ति सनातनम् । (दशवारं पठेत्) ॐ परब्रह्मणे नमः । ॐ तत् सत् । ततः पूर्ववदुत्तराङ्गन्यासं कृत्वाऽनेन वेदमन्त्रजपाख्येन कर्मणा- श्रीपरब्रह्मस्वरूपी सवितृनारायणः प्रीयताम्मयि । न मम श्रीब्रह्मार्पणमस्तु ।

अथ तारामन्त्रप्रयोगः

तत्रादौ पूर्वाऽभिमुखो भूत्वा आचमनं कुर्यात् । यथा- ॐ आत्मतत्त्वाय स्वाहा । ॐ विद्यातत्त्वाय स्वाहा । ॐ शिवतत्त्वाय स्वाहा । इत्याचम्य- ॐ सर्वतत्त्वाय स्वाहा । इति मन्त्रेण हस्तौ प्रक्षाल्य, हस्ते जलं गृहीत्वा- ॐ अस्य श्रीमहातारामन्त्रस्याऽक्षोभ्यऋषिरनुष्टुप्छन्दस्तारा देवता, ह्रीँ बीजम्, हूँ शक्तिः, स्त्रीँ कीलकम् । (कौडिण्य-

॥ ऋषिरनुष्टुप्छन्दस्तारा देवता, ह्रीं बीजम्, हूं शक्तिः, स्त्रीं कीलकम् । (कौडिण्य-

गोत्रोत्पन्नस्य कौडिण्य-वासिष्ठ-मैत्रावरुणीति-त्रिप्रवरस्य लोकनाथशर्म्मणो ममात्मनः) चतुर्वर्गपुरुषार्थ-प्राप्तिपूर्विकाऽभीष्टसिद्धये जपे विनियोगः। प्राणायामं कुर्यात् तद्यथा- दक्षिणहस्ताऽङ्गुष्ठेन दक्षनासापुटं निरुद्ध्य वामनासापुटेन- 'ॐ ३ ह्रीं' इति षोडशवारं जपन् पूरयेत् (इति पूरकः)- दक्षहस्ताऽनामिका-तर्जन्यङ्गुष्ठैर्नासापुटद्वयेन "ॐ ह्रीं" इति चतुष्षष्टिवारं जपन् कुम्भयेत् (इति कुम्भकः) पुनर्दक्षनासापुटमङ्गुष्ठनिरोधेन शनैः शनैः प्राणवायुंत्यक्त्वा "ॐ ह्रीं"- इति द्वात्रिंशद्वारं जपन् रेचयेत् (इति रेचकः)। इत्थं प्राणायामत्रयं कृत्या ऋष्यादिन्यासं कुर्यात् तद्यथा- ॐ अक्षोभ्यऋषये नमः- शिरसि। ॐ अनुष्टुप्छन्दसे नमः- मुखे। ॐ तारादेवतायै नमः- हृदये। ॐ ह्रीं - बीजाय नमः- गुह्ये। ॐ हूँ- शक्तये नमः- पादयोः। ॐ स्त्रीं कीलकाय नमः- सर्वाङ्गेषु। करन्यासः- ॐ ह्रां अङ्गुष्ठाभ्यां नमः। ॐ ह्रीं तर्जनीभ्यां स्वाहा। ॐ ह्रूं मध्यमाभ्यां वौषट्। ॐ ह्रैं अनामिकाभ्यां हुम्। ॐ ह्रौं कनिष्ठिकाभ्यां वषट्। ॐ ह्रः करतल-कर-पृष्ठाभ्यां फट्। अथ हृदयादिन्यासः- ॐ ह्रां हृदयाय नमः, ॐ ह्रीं शिरसे स्वाहा। ॐ ह्रूं शिखायै वषट्, ॐ ह्रैं कवचाय हुम्, ॐ ह्रौं नेत्रत्रयाय वौषट्, ॐ ह्रः अस्त्राय

फट् (इति वामहस्तस्य तर्जनीमध्यमाऽनामिकाभिर्वामहस्तमध्ये तालत्रयं कुर्यात्) । ततो मूलेन व्यापकं सप्तधा कुर्यात् ।

अथ ध्यानम्

प्रत्यालीढपदार्पिताङ्घ्रिशवहृद् घोराट्टहासा परा ।
खड्गेन्दीवरकर्तृ खर्परभुजाहुङ्कारबीजोद्भवा ॥
खर्वानीलविशालपिङ्गलजटा-जूटैकनागैर्युता ।
जाड्यन्न्यस्य कपालकर्तृ जगतां हन्त्युग्रतारा स्वयम् ॥

इति ध्यात्वा मानसोपचारैः पूजयेत् । यथा– ॐ लँ पृथिव्यात्मकं घ्राणरूपन्ते गन्धं समर्पयामि । तारायै नमः (उत्तानकनिष्ठिकाऽङ्गुष्ठाभ्याम्) । ॐ हँ आकाशात्मकं श्रोत्ररूपन्ते पुष्पं समर्पयामि तारायै नमः (अधोमुखतर्जनीभ्याम्) । ॐ यँ वाय्वात्मकं त्वग्रूपन्ते धूपं समर्पयामि तारायै नमः (उत्तानाङ्गुष्ठतर्जनीभ्याम्) । ॐ रँ ब्रह्मात्मकं चक्षुरूपन्ते दीपं समर्पयामि तारायै नमः (उत्तानमध्यमाङ्गुष्ठाभ्याम्) । ॐ वँ अमृतात्मकं

रसनारूपन्ते नैवेद्यं समर्पयामि तारायै नमः (उत्तानाऽनामिकाऽङ्गुष्ठाभ्याम्)। ॐ ऐं त्रिगुणात्मकं मनोरूपन्ते ताम्बूलं समर्पयामि तारायै नमः (उत्तानकनिष्ठिकाङ्गुष्ठाभ्याम्)। ॐ लं हं यं रं वं पञ्चतन्मात्रात्मिकां पुष्पाञ्जलिकां समर्पयामि तारायै नमः (इति समर्पणमुद्रया)। ततो मूलमन्त्रेण "श्रीसूर्यायेदमर्घ्यं दत्तं न मम" इति सूर्यायाऽर्घ्यं दत्त्वा यथाशक्ति जपं कृत्वा पूर्ववत् प्राणायामस्य न्यासं कुर्यात्। ततो हस्ते जलं गृहीत्वा।

ॐ "गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम्।
सिद्धिर्भवतु मे देवि! त्वत्प्रसादात्सुरेश्वरि!"

इति देव्या वामकरे जपं समर्प्य। अञ्जलिं बद्ध्वा।

"ॐ अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया।
चक्षुरुन्मिलितं येन तस्मै श्रीगुरवे नमः॥"

इति जपन् गुरुं प्रणमेत्। ततः पूर्वोक्तमंन्त्रैराचम्य ताराकवचं पठेत्।

ताराकवचम्

भैरव उवाच–

दिव्यं हि कवचं देवि ! तारायाः सर्वकामदम् ।
शृणुष्व ! परमं तत्तु तव स्नेहात्प्रकाशितम् ॥१॥

अक्षोभ्य ऋषिरित्यस्य छन्दस्त्रिष्टुबुदाहृतम् ।
ताराभगवती देवी मन्त्रसिद्धौ प्रकीर्तितम् ॥२॥

ओङ्कारो मे शिरः पातु ब्रह्मरूपा महेश्वरी ।
ह्रींङ्कारः पातु ललाटे बीजरूपा महेश्वरी ॥३॥

स्त्रीँ कारः पातु वदने लज्जारूपा महेश्वरी ।
हूङ्कारः पातु हृदये तारिणी शक्तिरूपधृक् ॥४॥

फट्कारः पातु सर्वाङ्गे सर्वसिद्धिफलप्रदा ।
खर्वा मां पातु देवेशी गण्डयुग्मे भयावहा ॥५॥

लम्बोदरी सदा स्कन्दयुग्मे पातु महेश्वरी ।
व्याघ्रचर्म्माऽऽवृतकटी पातु देवी शिवप्रिया ।।६।।

पीनोन्नतस्तनी पातु पार्श्वयुग्मे महेश्वरी ।
रक्तवर्तुलनेत्रा च कटिदेशे सदाऽवतु ।।७।।

ललज्जिह्वा सदा पातु नाभौ मां भुवनेश्वरी ।
करालाऽऽस्या सदा पातु लिङ्गे देवी हरप्रिया ।।८।।

विवादे कलहे चैव अग्नौ च रणमध्यतः ।
सर्वदा पातु मां देवी झिण्टीरूपा वृकोदरी ।।९।।

सर्वदा पातु मां देवी स्वर्गे मर्त्ये रसातले ।
सर्वाऽस्त्रभूषिता देवी सर्वदेवप्रपूजिता ।।१०।।

क्रीं क्रीं हूं हूं फट् फट्, सदा, पाहि पाहि समन्ततः ।
कराला घोरदशना भीमनेत्रा वृकोदरी ।।११।।

अट्टहासा महाभागा विघूर्णिता त्रिलोचना ।
लम्बोदरी-जगद्धात्री डाकिनी-योगिनी-युता ॥१२॥

लज्जारूपा योनिरूपा, विकटा देवपूजिता ।
पातु मां चण्डी मातङ्गी ह्युग्रचण्डा महेश्वरी ॥१३॥

जले स्थले चान्तरिक्षे तथैव शत्रुमध्यतः ।
सर्वतः पातु मां देवी खड्गहस्ता जयप्रदा ॥१४॥

कवचं प्रपठेद्यस्तु धारयेच्छृणुयादपि ।
न विद्यते भयं तस्य त्रिषु लोकेषु पार्वति ! ॥१५॥

इति कवचम् ।

अथ देव्याः मूलमन्त्रेण तर्पणादिकं कृत्वा नित्यमग्नौ होमयेदिति संक्षेपमात्रम् ।

अत्र गायत्र्याः पूजनं विस्तृतं न दर्शितं, मानसोपचारमात्रं पूर्वलिखितमावश्यकस्थले । पुरश्चरणात्मकं हवनञ्च ग्रन्थविस्तारभिया नोपस्थापितम् ।

कल्पस्थले । पुरश्चरणात्मक हवनञ्च ग्रन्थविस्तारभिया नोपस्थापितम् ।

अत्र नित्यहोमविषये किञ्चिद् वक्तव्यमेव तत्र तिलादर्धं तण्डुलं तण्डुलादर्धं यवं ततोऽर्धं शर्करां घृतञ्च सम्मेल्य तस्मिन् नारिकेलादिकं फलञ्च शाकल्येन संमिश्रणं कुर्यात् । पूर्वाऽभिमुख आसनमुपविश्याऽऽचम्य प्राणानायम्य सङ्कल्प्य च (संकल्प्यमानस्य वाक्यान्ते नित्यहोमङ्करिष्ये, इति योजयेत्) ततो वेद्यां कुण्डे वा पञ्चभूसंस्कारं विदध्यात् ।

पञ्चभूसंस्काराः

१) दर्भैः परिसमुह्य । (कुशैर्वेदीं परिमार्ज्य कुशानैशान्यां प्रक्षिपेत्)

२) गोमयोदकेनोपलिप्य । (गोमयजलाभ्यां लेपनं कुर्यात्)

३) स्रुवमूलेन त्रिरुल्लिख्य । (स्रुवमूलेन पूर्वादिक्रमेण तिस्रारेखा कुर्यात्)

४) अनामिकाङ्गुष्ठाभ्यां मृदमुद्धृत्य । ततोऽनामिकाङ्गुष्ठाभ्यां ताभ्योरेखाभ्य एव किञ्चिन्मृदं गृहीत्वा प्रक्षिपेत्)

५) उदकेनाऽभ्युक्ष्य । (वेद्यां जलं परिषिञ्चेत्)

ततः कांस्यपात्रे द्वितीयेन कांस्यपात्रेणाऽऽच्छाद्याऽग्निमाहरेत् । तमग्निमग्निकोणे निधाय किञ्चिदग्निमुद्धृत्य स्थापयेत् ततो निम्नाङ्कितं विनियोगं पठेत् ।

ॐ क्रव्यादमग्निमिति मन्त्रस्य प्रजापतिर्ऋषिः त्रिष्टुप्छन्दः, अग्निर्देवता अग्नि-संस्कारे विनियोगः । इति जलं भूमावुत्सृजेत् । ततः कुशान् प्रज्वाल्याऽधोलिखितेन मन्त्रेण वेदीं दर्शयित्वा नैर्ऋत्यां प्रक्षिपेत् वा स्थापयेत् ।

ॐ क्रव्यादमग्निं प्रहिणोमि दूरं यमराज्यं गच्छतुरिप्रवाहः । इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतुप्रजानन् ।

अग्निस्थापने विनियोगः

ॐ अयन्ते योनिरिति प्रजापतिर्ऋषिरनुष्टुप्छन्दोऽग्निर्देवता । अग्न्युपस्थापने विनियोगः । (जलं भूमावुत्सृजेत्) ततो निम्नाङ्कितेन मन्त्रेणाऽग्निं स्थापयेत् ।

ॐ अयन्ते योनिर्ऋत्वियो यतो जातोऽअरोचथाः ।
तञ्जानन्नग्नऽआरोहाथानोवर्द्धयारयिम् ।।

(अधोलिखितेन मन्त्रेणोत्तराग्रान् त्रयः कुशान् वेद्याः पूर्वस्मिन् भागे स्थापयेत्)
ॐ अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् ।

निम्नाङ्कितेन मन्त्रेण कृतपूर्वाग्रान् कुशान् वेद्याः, दक्षिणस्यां स्थापयेत् ।

ॐ इषे त्वोर्ज्जे त्वा वायवस्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्म्मणऽ-आप्यायध्वमघ्न्याऽइन्द्राय भागम्प्रजावतीरनमीवाऽअयक्ष्मा मा वस्तेनऽईशत माघशꣳसो ध्रुवाऽअस्मिन् गोपतौ स्यात बह्वीर्यजमानस्य पशून् पाहि ।

निम्नाङ्कितेन मन्त्रेण कृतोत्तरमुखान् त्रयः कुशान् वेद्याः पश्चिमे भागे स्थापयेत् ।

ॐ अग्नऽआयाहि वीतये गृहा नो हव्यदातये निहोता सत्सिबर्हिषि ।

कृतपूर्वाऽभिमुखान् कुशत्रयान् वेद्या उत्तरस्यां स्थापयेदनेन मन्त्रेण ।

ॐ शन्नोदेवीरभिष्टयऽआपो भवन्तु पीतये । शं योरभिस्रवन्तु नः ।

अथ कृतवेणुधमन्या वामेतर हस्तं मुखसन्निकटस्थं कृत्वा मुखोद्धूतेन वा वायुनाऽग्निं प्रज्वालयेत् । ततश्चाग्निं ध्यायेदाभ्यां मन्त्राभ्याम् ।

अग्निध्यानम्

ॐ चत्वारि शृङ्गास्त्रयोऽअस्य पादा द्वे शीर्षे सप्तहस्तासोऽअस्य । त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां२ ऽआविवेश ।

ॐ मुखं यः सर्वदेवानां हव्यभुक्कव्यभुक् तथा ।
पितॄणाञ्च नमस्तुभ्यं विष्णवे पावकात्मने इति ॥

ततोऽग्निं प्रार्थयेत्

ॐ भो, अग्ने ! शाण्डिल्यगोत्र ! मेषध्वज ! प्राङ्मुख ! मम सम्मुखो भव । ॐ पावकाऽग्नये नमः इत्युक्त्वाऽग्निं पूजयेत् । ततश्च लवणरहितं हविषान्नं (हविः) दक्षिण-हस्तस्थमध्यमाऽनामिकाङ्गुष्ठैस्तिस्र आहुतयो जुहुयात् । शान्ताऽग्नौ न होमयेत् ।

ॐ भूः स्वाहा इदमग्नये न मम । ॐ भुवः स्वाहा इदं वायवे न मम । ॐ स्वः स्वाहा, इदं सूर्याय न मम ।

निम्नाङ्कितैर्मन्त्रैः पञ्च आहुतयो दद्यात् ।

ॐ अग्नये स्वाहा, इदमग्नये न मम । ॐ धन्वन्तरये स्वाहा, इदं धन्वन्तरये न मम । ॐ विश्वेभ्यो देवेभ्यो स्वाहा, इदं विश्वेभ्यो देवेभ्यो न मम । ॐ प्रजापतये स्वाहा, इदं प्रजापतये न मम । ॐ अग्नये स्विष्टकृतये स्वाहा, इदमग्नये स्विष्टकृतये न मम ।

अधोलिखितैर्मन्त्रैः षडाहुतयो दद्यात् ।

ॐ देवकृतस्यैनसोऽवयजनमसि स्वाहा, इदमग्नये न मम ॥१॥

ॐ मनुष्यकृतस्यैनसोऽवयजनमसि स्वाहा, इदमग्नये न मम ॥२॥

ॐ पितृकृतस्यैनसोऽवयजनमसि स्वाहा, इदमग्नये न मम ॥३॥

ॐ आत्मकृतस्यैनसोऽवयजनमसि स्वाहा, इदमग्नये न मम ॥४॥

ॐ एनसऽएनसोऽवयजनमसि स्वाहा, इदमग्नये न मम ॥५॥

ॐ यच्चाहमेनो विद्वांश्चकार यच्चा विद्वांस्तस्य सर्वस्यैनसोऽवयजनमसि स्वाहा, इदमग्नये न मम ।

ततः प्रार्थनामन्त्रं पठित्वा स्रुवस्य-भस्मना तिलकं कुर्यात् ।

अग्निप्रार्थना

ॐ सप्त तेऽअग्ने समिधः सप्तजिह्वा सप्तऋषयः सप्तधामप्रियाणि । सप्तहोताः सप्तधा त्वा यजन्ति सप्तयोनी रापृणस्व घृतेन स्वाहा ।

अनेन नित्ययज्ञेन श्रीपरमेश्वरः प्रीयतां न मम । ॐ तत्सत् ब्रह्मार्पणमस्तु । इति इतो देवपूजातर्पणादिकं कुर्यात् । □

॥ अथ शताक्षरीगायत्री (महामृत्युञ्जय) मन्त्रः ॥

मन्त्रोऽयं गायत्र्याः बहिः पूजायां कलशे गायत्रीमावाहनेऽपि प्रयोज्यः ।

ॐ भूर्भुवः स्वः, ॐ तत्सवितुर्वरेणियं, ॐ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः । स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः । ॐ भर्गो देवस्य धीमहि, ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान् मृत्योर्मुक्षीयमाऽमृतात् । ॐ धियो यो नः प्रचोदयात्, ॐ स्वः भुवः भूः, ॐ नमः ।

वेदाऽधिकाररहितानां गायत्रीमन्त्रः

ॐ ह्रीँ यो देवः सविताऽस्माकं मनः प्राणेन्द्रियक्रियाः ।
प्रचोदयति यद् भर्गो वरेण्यं समुपास्महे ॥१॥
यो देवः सविताऽस्माकं धियो धर्मादिगोचरे ।
प्रेरयेत्तस्य तद्भर्गस्तद्वरेण्यमुपास्महे ॥ इति पाठान्तरञ्च ।

मध्याह्नसूर्यार्घ्ये मन्त्रः (हंसमन्त्रः)

मध्याह्नसूर्यार्घ्ये मन्त्रः (हंसमन्त्रः)

ॐ ह्ँसः शुचिषद्वसुरन्तरिक्ष सद्धोता वेदिषदतिथिर्दुरोणसत् । नृषद्वर सदृत सदव्योम सदब्जा गोजाऽऋतजाऽअद्रिजाऽऋतं बृहत् ।

जपान्ते पठनीया मन्त्राः

ॐ जातवेदसे मारीचः कश्यपोऽग्निस्त्रिष्टुप् । तच्छंयोः शंयुः विश्वेदेवाः शक्करी नमो ब्रह्मण इति ब्रह्मणस्पतिर्विश्वेदेवा जगती उपस्थापने विनियोगः ।

ॐ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेद । स न पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः । तच्छंयोरावृणीमहे गातुं यज्ञाय गातुं यज्ञपतये दैवी स्वस्तिरस्तु नः स्वस्तिर्मानुषेभ्यः । ऊर्ध्वंजिगातु भेषजम् । शं नोऽअस्तु द्विपदे शं चतुष्पदे । नमो ब्रह्मणे नमोऽअस्त्वग्नये नमः, पृथिव्यै नमः ओषधीभ्यः ।

नमो वाचे, नमो वाचस्पतये, नमो विष्णवे महते करोमि ।

□

सर्वकामप्रदः

।। शताक्षरा–गायत्रीमन्त्रः ।।

(महामृत्युञ्जयः)

[1]ॐ भूर्भुवः स्वः, ॐ तत्सवितुर्वरेणियं, ॐ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः । स नः पर्षदति दुर्गाणि विश्वानावेव सिन्धुं दुरितात्यग्निः । ॐ भर्गो देवस्य धीमहि, ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम् । उर्व्वारुकमिव बन्धनान्मृत्योर्मुक्षीय-माऽमृतात् । ॐ धियो यो नः प्रचोदयात्, ॐ स्वः भुवः भूः ॐ नमः ।

---

१. "मन्त्रमादौ पुनः श्लोकमन्ते मन्त्रं पुनः पठेत् ।
पुनर्मन्त्रं पुनः श्लोकं क्रमोऽयमुदयः शुभः ।
उदयोत्कर्षलाभाय सम्पुटोऽयमुदाहृतः ।।"

[2]ॐ भूर्भुवः स्वः, ॐ तत्सवितुर्वरेणियं, भर्गो देवस्य धीमहि, धियो यो नः प्रचोदयात्, ॐ जातवेदसे सुनवाम, सोमराती यतो निदहाति वेदः। स नः पर्षदति दुर्गाणि विश्वानावेव सिन्धुं दुरितात्यग्निः, ॐ त्र्यम्बकं यजामहे सुगन्धि पुष्टिवर्द्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमाऽमृतात्, ॐ त् या द चो प्र नः यो यो धि हि म धी स्य व दे र्गो भ यं णि रे र्व तु वि सत् त ॐ स्वः भुवः भूः ॐ नमः।

(समस्तापद्–रोग–नाशकरः)

हरि ॐ तत्सत्

□

---

२. मन्त्रमादौ समुच्चार्य ततो नामाखिलं पठेत्।
अन्ते व्युत्क्रमतो मन्त्रमेष संपुट ईरितः ॥"   (मं. महो.)
(व्युत्क्रमोच्चारणे मन्त्रानर्थक्यं नेति आगमेषु स्पष्टम्)

अथ क्षुधादि निरसन–गायन्त्रीमन्त्र–प्रयोगः

(तत्रादौ सप्रणवगायत्रीभिरात्मानं वेष्टयित्वा रक्षां कुर्यात्)– ॐ बलाऽतिबलयोरनयोर्विराट्पुरुषऋषिः । गायत्रीछन्दः, गायत्री देवता । अकारोकारमकाराः, बीजाद्याः । (कौडिन्यगोत्रोत्पन्नः कौडिन्य–वासिष्ठ–मैत्रावरुणीति त्रिप्रवरो लोकनाथ शर्माऽहम्), मम सर्वविधक्षुधादिनिरसनार्थे जपे विनियोगः । क्लीमित्यादिषडङ्गन्यासः ।

ऋष्यादिन्यासः

ॐ विराट्पुरुष ऋषये नमः– मूर्ध्नि । गायत्री छन्दसे नमः– मुखपङ्कजे । गायत्रीदेवतायै नमः– हृदये । अकारोकारमकारेभ्यो बीजाद्येभ्यो नमः– गुह्ये । क्लीँ इति शक्तये नमः– पादयोः । ॐ ह्रौँ कीलकाय नमः सर्वाङ्गेषु ।

कराङ्गन्यासः

ॐ बलायै महादेव्यै, अङ्गुष्ठाभ्यान्नमः । ॐ ह्रों महाबलायै तर्जनीभ्यां स्वाहा । ॐ क्लीं चतुर्विधपुरुषार्थं सिद्धिप्रप्रदायै तत्सवितुर्वरदात्मिकायै मध्यमाभ्यां वषट् ।

ॐ ह्रों वरेण्यं भर्गो देवसे वरदात्मिकायै, अतिबलायै सवदयामूर्त्यै बलायै, अनामिकाभ्यान्नमः ।

ॐ सर्वक्षुद् भ्रमोपशमन्यै धीमहि धियो या नो जातायै कनिष्ठकाभ्यान्नमः ।

ॐ प्रचुर्यः या प्रचोदयादात्मिकायै प्रणवशिरस्कायै करतलकरपृष्ठाभ्यां हूँ फट् स्वाहा ।

हृदयादिन्यासः

ॐ ह्रीं बलायै महादेव्यै— हृदयाय नमः ।

ॐ ह्रीं महाबलायै— शिरसे स्वाहा ।

ॐ क्लीं चतुर्विधपुरुषार्थसिद्धिप्रदायै तत्सवितुर्वरदात्मिकायै शिखायै वषट् ।

ॐ ह्रीं वरेण्यं भर्गो देवस्य वरदात्मिकायै, अतिबलायै सर्वदया-मूर्त्यै-बलायै-कवचाय हुम् ।

ॐ सर्वक्षुद्भ्रमोपशमन्यै धीमहि धियो यो नो जातायै नेत्रत्रयाय वौषट् ।

ॐ प्रचुर्याः या प्रचोदयादात्मिकायै प्रणवशिरात्मकायै हुम् फट् स्वाहा अस्त्राय फट् ।

ॐ ह्रीं बले महादेवि (पादयोः), ॐ ह्रीं महाबले (जङ्घयोः) ।

ॐ क्लीं चतुर्विध पुरुषार्थ सिद्धिप्रदे (कटिदेशे) ।

ॐ तत् सवितुर्वरदात्मिके (नाभौ) ।

ॐ ह्रीं वरेण्यं (हृदये) ।

ॐ भर्गो देवस्य वरदात्मिके (गले) ।

ॐ अतिबले सर्वदयामूर्तिबले (जिह्वायाम्) ।

ॐ सर्वक्षुद्भ्रमोपशमनि धीमहि (लोचनयोः) ।

ॐ धियो यो नो जाते (ललाटे) ।

ॐ प्रचुर्याः या प्रचोदयादात्मिके प्रणवशिरस्कात्मिके हुम् फट् स्वाहा (मूर्ध्नि) ।

अथ ध्यानम्

अथ ध्यानम्

"अमृतकरतलाद्री सर्वसञ्जीवनाढ्यावघहरण सुदक्षौं वेवसारे मयूखे ।
प्रणवमयविकारौ भास्कराकारदेहौ सततमनुभवेऽहं तौ बलाऽतिबलान्तौ ॥१॥"

मन्त्रस्वरूपम्

ॐ ह्रीं बले महादेवि ह्रीं महाबले क्लीं चतुर्विधपुरुषार्थसिद्धिप्रदे तत्सवितुर्वरदात्मिके ह्रीं वरेण्यं भर्गो देवस्य वरदात्मिके, अतिबले सर्वदयामूर्तिबले सर्वक्षुद्भ्रमोपशमनि धीमहि धियो यो नो जाते प्रचुर्याः या प्रचोदयादात्मिके प्रणवशिरस्कात्मिके हुम् फट् स्वाहा । एवं विद्वान् कृतकृत्यो भवति सावित्र्या एव सलोकता जयतीत्युपनिषद् (इति सावित्र्युपनिषदि)

'चतुष्षष्टिकला विद्या सकलैश्वर्यसिद्धिदम् ।
जपारम्भे च हृदयं जपान्ते कवचं पठेत् ॥'

□

अत्यावश्यक भोजन विधिः (संक्षिप्त)

आयुः सत्वबलारोग्यसुखप्रीतिविवर्द्धनाः ।
रस्याः स्निग्धाः स्थिराः हृद्या आहाराः सात्त्विकप्रियाः ।।१।। (गीता)

आयुवर्द्धक, सात्त्विक भावोत्पादक, बलदायी, आरोग्यप्रद, सुख एवं रुचिवर्द्धक घृत–दूध आदि युक्त सात्त्विक अन्न–फल आदि आहार ग्रहण गर्नुपर्छ ।

एकपङ्क्त्युपविष्टानां विप्राणां सह भोजने ।
यद्येकोऽपि त्यजेत्पात्रं शेषमन्नं न भुज्यते ।।२।।

एकसाथ बसेर भोजन गर्ने ब्राह्मणहरूमध्ये (यदि) एकै जना मात्र उठेमा पनि अरूले भोजन गर्न हुँदैन ।

उपलिप्ते शुची देशे पादौ प्रक्षाल्य वाग्यतः ।
प्राङ्मुखोऽन्नं तु भुञ्जीत शुचिः पीठमधिष्ठितः ।।३।।

शुद्ध स्थानमा हात गोडा धोई आसनमा (पिर्कामा) बसेर पूर्व फर्की मौन भएर खानु ।

नृणां भोजनकाले तु यदि दीपो निवर्तते ।
तदन्नं पाणिना स्पृष्ट्वा सावित्रीं मनसा स्मरेत् ।
पुनर्दीपं ततो लब्ध्वा शेषं भुञ्जीत वाग्यतः ।।४।।

खाँदाखाँदै बत्ती निभ्न गएमा खान बन्द गरी गायत्री मन्त्र स्मरण गर्नु, पुनः बत्ती बलेपछि खानु । भोजन गर्नु अघि भगवान्को चरणोदक, तुलसीपत्र खानु, पवित्र वस्त्र लगाई भगवान्को ध्यान गरी आफ्नो सामु ब्राह्मणले चतुष्कोणात्मक, क्षेत्रीले त्रिकोणात्मक र वैश्यले बाटुलो चौकी जलद्वारा बनाई, अन्नपात्र राखी आपोशन (चित्ताहुति) र प्राणाहुति-विधि-मन्त्र पूर्वक भोजन गर्नुपर्छ ।

चित्राहुति (आपोशन).

प्रातः- ॐ ऋतं त्वर्तेन परिषिञ्चामि अन्तश्चरति भूतेषु गुहायां विश्वमूर्तिषु । (वेदीमा जल छर्कने) ।

सायं- ॐ सत्यं त्वर्तेन परिषिञ्चामि अन्तश्चरति भूतेषु गुहायां विश्वमूर्तिषु । (वेदीमा जल छर्कने) ।

ॐ भूपतये स्वाहा, ॐ भुवनपतये स्वाहा, ॐ भूतानां पतये स्वाहा, ॐ चित्राय स्वाहा, ॐ चित्रगुप्ताय स्वाहा ।

यी मन्त्रले पाँच ठाउँमा चढाउनु र फेरि छुट्टै—

ॐ यमाय धर्माय स्वाहा ।

भनी चढाउनु ।

ॐ अग्नये स्वाहा ।

आगोमा हवन गर्नु ।

फेरि प्रत्येकमा जल चढाउनु । त्यसपछि तलको मन्त्रले आचमन गर्नू ।

ॐ अमृतोपस्तरणमसि स्वाहा ।

अलि अलि अन्न पाँच औंलाले लिएर तलका मन्त्रले प्राणाहुति (भोजन) गर्नु ।

ॐ प्राणाय स्वाहा, ॐ अपानाय स्वाहा, ॐ व्यानाय स्वाहा, ॐ उदानाय स्वाहा, ॐ समानाय स्वाहा ।

फेरि बायाँ हातको बूढी साँहिली र माफी औंलोले आँखामा पानी लगाई भगवान्को ध्यान गरी भोजनको अन्त्यमा हातमा जल लिई यो मन्त्रले मौन भएर खानु ।

ॐ अमृतापिधानमसि स्वाहा ।

यो मन्त्रले आचमन गरेर अलिकति भुक्त शेष अन्न हातमा लिनु र तलको मन्त्र पढी दक्षिणतर्फ पितृ तीर्थले दिनु । (यो जीवित पितृकले पनि दिनेपर्छ)

मद्भुक्तोच्छिष्टशेषं ये भुञ्जते पितरोऽधमाः ।
तेषामन्नं मया दत्तमक्षय्यमुपतिष्ठतु ।।

त्यसपछि मुखशुद्धि– 'न्यूनतम' १६ पटक कुल्ला गरी गर्नु र अनि चिसै हातले नाभि मुसारेर तलको मन्त्र पढ्नु ।

अगस्त्यं कुम्भकर्णञ्च शनिञ्च वडवानलम् ।
आहारपरिपाकाय संस्मरामि वृकोदरम् ।।१।।
आतापी भक्षितो येन वातापी च महाबलः ।
समुद्रः शोषितो येन स मेऽगस्त्यः प्रसीदतु ।।२।।

याद राख्नुपर्ने कुरा – उपनीत बालकलाई यो भोजन विधि सिकाउनु र उपस्थित गराउनु अति जरुरी छ, आजभोलि प्रायः सिकाएको देखिदैन ।

एक वस्त्रले नखानु, नाङ्गै ननुहाउनु, बाटोमा, भस्ममा, गोठमा (गाईको सामु) मलमूत्र त्याग नगर्नू । बाँया हातले नखानु । यसले अनिष्ट हुन्छ पनि भनिएको छ ।

नान्नमद्यादेकवासा न नग्नः स्नानमाचरेत् ।
न मूत्रं पथि कुर्वीत न भस्मनि न गोव्रजे ।।
नाश्नीयात् भार्यया सार्धं नैनामीक्षेत चाश्नतीम् ।
क्षुवतीं जृम्भमाणां वा न चासीनां यथासुखम् ।।१।।
नाञ्जयन्तीं स्वके नेत्रे न चाभ्यक्तामनावृताम् ।
न पश्येत् प्रसवन्तीं च तेजस्कामो द्विजोत्तमः ।।

तेज (कल्याण) चाहने पुरुषले स्त्रीका साथ एक पात्रमा वा भिन्न पात्रमा पनि भोजन नगर्नु, छिउँ गरेकी, हाई गरेकी, वेपर्दा आनन्द मानी बसेकी, गाजल लगाइरहेकी, तेल लगाइरहेकी, प्रसुती भइरहेकी, स्तन खुला भएकी स्त्रीलाई नहेर्नु । अल्पायु र रोगी होइन्छ ।

।। अथ देवर्षि–पितृ–तर्पण–प्रयोगः ।।

तत्राऽऽदावाचम्य, कुश, तिल, जलान्यादाय, हरिः ॐ तत्सत् ३, विष्णु ३ । श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य सकलजगत्सृष्टिकारिणो ब्रह्मणो द्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरेऽष्टाविंशतितमे कलौ प्रथमचरणे बौद्धाऽवतारे प्रभवादिषष्टिसंवत्सराणां मध्ये अमुकनाम्नि संवत्सरे श्रीसूर्ये अमुकाऽयनेऽमुकर्तौ, (सौराच्चान्द्राच्च) अमुकमासे अमुकपक्षे, अमुकवासरान्वितायां अमुकतिथौ अमुकराशिस्थिते श्रीसूर्ये अमुकराशिस्थिते चन्द्रमसि, अमुकराशिस्थिते देवगुरौ शेषेष्वन्येषु ग्रहेषु यथा यथास्थान स्थितेषु सत्सु, अद्येहाऽमुकगोत्रोऽमुकशर्माऽहं मम पितृपितामह-प्रपितामहानाममुकाऽमुकशर्मणां सपत्नीकानां वसुरुद्राऽऽदित्यस्वरूपाणां तथा, अमुक-गोत्राणां मातामह प्रमातामहवृद्ध प्रमातामहानां अमुकाऽमुकशर्मणां सपत्नीकानां

वसु-रुद्राऽऽदित्यस्वरूपाणामन्येषां पितृणां च, अक्षय्यतृप्तिकामनया देवर्षि-दिव्यपितृ-स्वपितृणां च नित्यतर्पणं (एकोद्दिष्टश्राद्धाऽङ्गभूतं, पार्वणश्राद्धाङ्गभूतं वा तर्पणं) अहं करिष्ये इति संकल्प्य, सव्येन, प्राङ्मुखः कुशपाणिर्देवतीर्थवर्तिना सकुशोदकेन- "ॐ विश्वेदेवासऽआगत शृणुताम ऽइम ँ हवम् । एदम्बर्हिर्निषीदत । विश्वेदेवाः शृणुते म ँ हवं मे येऽअन्तरिक्षे यऽउपद्यविष्ठ येऽअग्निजिह्वा उत वा यजत्राऽआसद्यास्मिन् बर्हिषिमादयध्वम् ।" ॐ भूर्भुवः स्वः ब्रह्मादयो देवा इहागच्छत, इह तिष्ठतेमाङ्गृह्णन्त्वपोऽञ्जलीन् । ॐ ब्रह्मा तृप्यताम्, ॐ विष्णुस्तृप्यताम्, ॐ रुद्रस्तृप्यताम्, ॐ प्रजापतिस्तृप्यताम्, ॐ देवास्तृप्यन्ताम्, ॐ छन्दांसि तृप्यन्ताम्, ॐ वेदास्तृप्यन्ताम्, ॐ ऋषयस्तृप्यन्ताम्, ॐ पुराणाऽऽचार्यास्तृप्यन्ताम्, ॐ गन्धर्वास्तृप्यन्ताम्, ॐ इतराचार्यास्तृप्यन्ताम्, ॐ संवत्सरः सावयवस्तृप्यताम्, ॐ देवास्तृप्यन्ताम्, ॐ अप्सरसस्तृप्यन्ताम्, ॐ देवानुगास्तृप्यन्ताम्, ॐ नागास्तृप्यन्ताम्, ॐ सागरास्तृप्यन्ताम्, ॐ पर्वतास्तृप्यन्ताम्, ॐ सरितस्तृप्यन्ताम्, ॐ यक्षास्तृप्यन्ताम्, ॐ रक्षांसि तृप्यन्ताम्, ॐ पिशाचास्तृप्यन्ताम्, ॐ सुपर्णास्तृप्यन्ताम्, ॐ भूतानि तृप्यन्ताम्, ॐ पशवस्तृप्यन्ताम्, ॐ वनस्पतयस्तृप्यन्ताम्, ॐ ओषधयस्तृप्यन्ताम्, ॐ भूतग्रामश्चतुर्विधस्तृप्यन्ताम् ।

ॐ मरीचिस्तृप्यताम्, ॐ अत्रिस्तृप्यताम्, ॐ अङ्गिरास्तृप्यताम्, ॐ पुलस्त्यस्तृप्यताम्, ॐ पुलहस्तृप्यताम्, ॐ क्रतुस्तृप्यताम्, ॐ प्रचेतास्तृप्यताम्, ॐ वसिष्ठस्तृप्यताम्, ॐ भृगुस्तृप्यताम्, ॐ नारदस्तृप्यताम् । ततो निवीती (माल्यवत्) उदङ्मुखः कायतीर्थवर्तिना कुशोदकेन मनुष्याँस्तर्पयेत् ।[1]

ॐ भूर्भुवः स्वः सनकादयः सप्तमनुष्या इहागच्छत, इह तिष्ठतेमाङ्गृह्णन्त्वपोऽञ्जलीन् । ॐ सनकस्तृप्यताम्, ॐ सनन्दनस्तृप्यताम्, ॐ सनातनस्तृप्यताम्, ॐ कपिलस्तृप्यताम्, ॐ आसुरिस्तृप्यताम्, ॐ वोढुस्तृप्यताम्, ॐ पञ्चशिखस्तृप्यताम् । ततः प्राचीनावीति (अपसव्येन) दक्षिणाऽभिमुखः पातितवामजानुर्मोटितकुशतिलाञ्जलित्रयेण खड्गपात्रेणाऽर्घेन वा पितृतीर्थेन तर्पयेत् । ॐ उशन्तस्त्वा निधीमह्युशन्तः समिधीमहि । उशन्नुशतऽआवहपितॄन् हविषे अत्तवे । आयन्तु नः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः अस्मिन् यज्ञे स्वधया मदन्तोऽधिब्रुवन्तु तेऽवन्त्वस्मान् (इति मन्त्रद्वयेन दिव्यपितृ-

---

१. प्रथमं तर्पयेद्देवान् ब्रह्मादीन् सुसमाहितः ।
ततः सन्तर्पयेद् विद्वान् मरीचिप्रमुखानृषीन् ॥ (इति ब्राह्मे)

नावाह्य तर्पयेत्) ॐ भूर्भुवः स्वः कव्यवाडनलादयो दिव्यपितर इहागच्छतेह तिष्ठते-
माङ्गृह्णन्त्वपोऽञ्जलीन्, ॐ कव्यवाडनलस्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः ३,
ॐ सोमस्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः ३, ॐ यमस्तृप्यतामिदं तिलोदकं तस्मै
स्वधा नमः ३, ॐ अर्यमास्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः ३, ॐ अग्निष्वात्तास्तृ-
प्यन्तामिदं तिलोदकं तेभ्यः स्वधा नमः ३, ॐ सोमपास्तृप्यन्तामिदं तिलोदकं तेभ्यः स्वधा
नमः ३, ॐ बर्हिषदस्तृप्यन्तामिदं तेभ्यः स्वधा ३, ॐ यमाय नमः ३, ॐ धर्मराजाय
नमः ३, ॐ मृत्यवे नमः ३, ॐ अन्तकाय नमः ३, ॐ वैवस्वताय नमः ३, ॐ कालाय
नमः ३, ॐ सर्वभूतक्षयाय नमः ३, ॐ औदुम्बराय नमः ३, ॐ दध्नाय नमः ३, ॐ नीलाय
नमः ३, ॐ परमेष्ठिने नमः ३, ॐ वृकोदराय नमः ३, ॐ चित्राय नमः ३, ॐ चित्र-
गुप्ताय नमः ३, ततः, आगच्छन्तु मे पितर इमाङ्गृह्णन्त्वपोऽञ्जलीन्, ॐ उदीरता-
मवरऽउत्परासऽउन्मध्यमाः पितरः सोम्यासः। असुँयऽईयुरवृकाऽऋतज्ञास्ते नोवन्तुपितरो-
हवेषु। ॐ अद्येहाऽमुकगोत्रोऽस्मत्पिताऽमुकशर्मा वसुस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै
स्वधा नमः। १) ॐ अङ्गिरसोनः पितरो नवग्वाऽअथर्वाणो भृगवः सोम्यासस्तेषां वयँ

सुमतौ यज्ञियानमपि भद्रे सौमनसे स्याम । ॐ अद्येहाऽमुकगोत्रोऽस्मत्पिताऽमुकशर्मा वसुस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः । २) ॐ आयन्तु नः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः अस्मिन् यज्ञे स्वधया मदन्तोऽधिब्रुवन्तु तेऽवन्त्वस्मान् । ॐ अद्येहाऽमुकगोत्रोऽस्मत्पिताऽमुकशर्मा वसुस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः । तृप्यध्वम् ३ ।

ॐ ऊर्ज्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम् स्वधास्थ तर्पयत मे पितॄन् । ॐ अद्येहाऽमुकगोत्रोऽस्मत्पितामहोऽमुकशर्मा रुद्रस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः । १) ॐ पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः । अक्षन्नपितरोऽमीमदन्त पितरोऽतीतृपन्त पितरः पितरः शुन्धध्वम् । ॐ अद्येहाऽमुकगोत्रोऽस्मत्पितामहोऽमुकशर्मा रुद्रस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः । २) ॐ ये चेह पितरो ये च नेह यांश्चविद्मयाँ२ऽउचन प्रविद्म त्वं वेत्थ यति जातवेदः स्वधाभिर्यज्ञꣳ सुकृतं जुषस्व । ॐ अद्येहाऽमुकगोत्रोऽस्मत्पितामहोऽमुकशर्मा रुद्रस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः ३ । तृप्यध्वम् ३ । १) ॐ मधुव्वाताऽऋतायते मधु क्षरन्ति सिन्धवः माध्वीर्नः सन्त्वोषधीः । ॐ अद्येहाऽमुक-

गोत्रोऽस्मत् प्रपितामहोऽमुकशर्मा आदित्यस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः। २) ॐ मधुमान्नो वृहस्पतिर्मधुमाँ२ँ।।ऽअस्तु सूर्यः। माध्वीर्गावो भवन्तु नः। ॐ अद्येहाऽमुकगोत्रोऽस्मत् प्रपितामहोऽमुकशर्मा आदित्यस्वरूपस्तृप्यतामिदं तस्मै स्वधा नमः। तृप्यध्वम् ३। ॐ आमाव्वाजस्यप्रसवो जगम्यादे मे द्यावा पृथिवीव्विश्वरूपे। आमागन्ता-पितरा मातराचामा सोमोऽअमृतत्वेन गम्यात्। ॐ अद्येहाऽमुकगोत्राऽस्मन्माताऽमुकदेवी वसुस्वरूपा तृप्यतामिदं तिलोदकं तस्यै स्वधा नमः। इति (१) (२) (३) अञ्जली-र्दद्यात्। पूर्वोक्तमन्त्रमुच्चार्य, ॐ अद्येहाऽमुकगोत्राऽस्मत्पितामही अमुकदेवी रुद्रस्वरूपा तृप्यतामिदं तिलोदकं तस्यै स्वधा नमः। इति (१) (२) (३) अञ्जलीर्दद्यात्। ततः पूर्वोक्तमन्त्रमुच्चार्य ॐ अद्येहाऽमुकगोत्राऽस्मत्प्रपितामही अमुकदेवी आदित्यस्वरूपा तृप्यतामिदं तिलोदकं तस्यै स्वधा नमः। इति (१) (२) (३) अञ्जलीर्दद्यात्[२]

---

२. मातृमुख्यास्तु यास्तिस्रस्तासां दद्याज्जलाञ्जलीन्।
स्त्रीन् स्त्रीनप्यथ यास्त्वन्यास्ता मेकैकमञ्जलिम्॥ (इति शालकायनः)

मन्यांश्चैकैकमञ्जलिं दद्यात् । ॐ नमो वः पितरो रसाय नमो वः पितरः शोषाय नमो वः पितरो जीवाय नमो वः पितरः स्वधायै नमो वः पितरो घोराय नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो वो गृहान्नः पितरो दत्तसतो वः पितरो द्वेष्मैतद्वः पितरो वासः । ॐ अद्येहाऽमुकगोत्रोऽस्मन्मातामहोऽमुकशर्मा सपत्नीको वसुस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा ३ । तृप्यध्वम् ३ । ॐ अद्येहामुकगोत्रोऽस्मत्प्रमातामहोऽमुकशर्मा सपत्नीक रुद्रस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा ३, तृप्यध्वम् ३ । ॐ अद्येहाऽमुकगोत्रोऽस्मद्वृद्धप्रमातामहोऽमुकशर्मा सपत्नीक आदित्य-स्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः ३, तृप्यध्वम् ३ । ततो वक्ष्यमाणश्लोकाऽनुसारेण-सपत्नमातृ-स्वभार्या-पुत्रादि-ज्येष्ठ-कनिष्ठपितृव्य-तत्पत्नी-मातुल-मातुलानी-स्वभ्रातृ-तत्पत्नी-पितृष्वसृ-तत्पति-पुत्र-स्वभगिनी-तत्पति-पुत्र-श्वसुर-दीक्षा-गायत्री-गुरु-शिष्य-स्वहितकर्तॄन् मित्रादीन् समस्तपितृनेतान् यथोक्तेनाञ्जलिना तर्पयेत् ।

तातांम्बत्रितयं सपत्नजननी मातामहादित्रयं
सस्त्री स्त्री तनयादि तातजननी स्वभ्रातरः सस्त्रियः ।

तातांबाऽत्मभगिन्यपत्यधवयुग् जायापिता सद्गुरुः
शिष्याप्ताः पितरो महालयविधौ तीर्थे तथा तर्पणे ।।

ततो वक्ष्यमाणमन्त्रेण आब्रह्मस्तम्बपर्यन्त-देवर्षि-पितृमानवादीन्तिलोदकाञ्जलिभिस्तर्पयेत्-

ॐ आब्रह्मस्तम्बपर्यन्तं देवर्षिपितृमानवाः ।
तृप्यन्तु पितरः सर्वे मातृमातामहादयः ।।१।।
पितृवंशे मृता ये च मातृवंशे तथैव च ।
गुरुश्वशुरबन्धूनां ये चान्ये बान्धवा मृताः ।।२।।
ते तृप्तिमखिला यान्तु ये चास्मत्तोयकाङ्क्षिणः ।
ये बान्धवाऽबान्धवा वा येऽन्यजन्मनि बान्धवाः ।।३।।
ते सर्वे तृप्तिमायान्तु मद्दत्तेनाम्बुनाऽखिलाः ।
देवासुरास्तथा यक्षा नागा गन्धर्वराक्षसाः ।।४।।

पिशाचा गुह्यकाः सिद्धाः कूष्माण्डास्तरवःखगाः ।
जलेचरा भूमिचरा वाय्वाहाराश्च जन्तवः ॥५॥
ते तृप्तिमखिला यान्तु मद्दत्तेनाम्बुनाऽखिलाः ।
नरकेषु समस्तेषु यातनासु च ये स्थिताः ॥६॥
तेषामाप्यायनायैतद् दीयते सलिलं मया ।
प्रतीतकुलकोटीनां सप्तद्वीपनिवासिनाम् ॥७॥
आब्रह्मभुवनाल्लोकानिदमस्तु तिलोदकम् ।
यत्र क्वचन संस्थानां क्षुत्तृष्णोपहतात्मनाम् ॥८॥
इदमक्षय्यमेवाऽस्तु मया दत्तं तिलोदकम् ।

अथ वस्त्रनिष्पीडनम्

प्रमीतमातृकेण वस्त्रनिष्पीडनं न कार्यमन्येषां दातुमनधिकारात् । पितरि जीवति मातरि मृतायां श्राद्धाङ्गतर्पणे, अन्येषां दातुमनधिकारात्केवलं मातृतर्पणमेव भवति, अतो वस्त्रनिष्पीडनं न कार्यमित्यवगन्तव्यम् ।

ये के चाऽस्मत्कुले जाता अपुत्रा गोत्रिणो मृताः ।
ते पिबन्तु मया दत्तं वस्त्रनिष्पीडनोदकम् ॥

सव्यं कृत्वा पूर्वाभिमुखो भूत्वा जले षट्चक्रं विलिख्य ब्रह्मादीन् देवान् पूजयेत् । ॐ ब्रह्मयज्ञानम्प्रथमं पुरस्ताद्विशीमतः सुरुचोव्वेनऽआवः । सबुध्न्याऽउपमाऽअस्यविष्ठाः शतश्च योनिमशतश्चव्विव:, ॐ ब्रह्मणे नमः । ॐ इदं व्विष्णुर्व्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पाᳪसुरे स्वाहा, ॐ विष्णवे नमः । ॐ नमस्ते रुद्रमन्यवऽउतोतऽइषवे नमः, बाहुभ्यामुतते नमः । ॐ रुद्राय नमः, ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्, ॐ सवित्रे नमः । ॐ मित्रस्य चर्षणी धृतो वो देवस्य सानसि, द्युम्नश्चित्रश्रवस्तमम्, ॐ मित्राय नमः । ॐ व्वरुणस्योत्तम्भनमसि व्वरुणस्यस्कम्भसर्जनीस्थो व्वरुणस्यऽऋतसदन्न्यसि व्वरुणस्यऽऋतसदनमसि व्वरुणस्यऽऋतसदनमासीद । ॐ वरुणाय नमः ।

अथोत्थाय सूर्यायार्घ्यं दद्यात् । अर्घपात्रे जल-गन्ध-पुष्पादीनि निक्षिप्य- ॐ एहि सूर्य सहस्रांशो तेजोराशे जगत्पते । अनुकम्पय मां भक्त्या गृहाणार्घ्यं दिवाकर । इत्यर्घं

दत्त्वोत्थायैव सूर्योपस्थानं कुर्यात्- ॐ उदुत्यमस्य केतवो विरश्मयोजनांऽ।।ऽअनु। भ्राजन्तोऽअग्नयो यथा। उपयामगृहीतोसि सूर्यायत्वाभ्राजायैषते योनिः सूर्यायत्वाभ्राजाय। सूर्यभ्राजिष्ठभ्राजिष्ठस्त्वन्देवेष्वसिभ्राजिष्ठोहम्मनुष्येषु भूयासम्। ॐ हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता व्वेदिसद तिथिदुरोणसत्। नृषद्वरसदृत सद्व्योम सदब्जा गोजाऽऋतजाऽअद्रिजाऽऋतं बृहत्। इत्युपस्थाय प्रदक्षिणीकृत्य दिग्देवेभ्यश्च प्रणमेत्। ॐ प्राच्यै दिशे नमः, ॐ इन्द्राय नमः ॐ आग्नेयै दिशे नमः, ॐ अग्नये नमः, ॐ दक्षिणस्यै दिशे नमः, ॐ यमाय नमः, ॐ नैर्ऋत्यै दिशे नमः, ॐ निर्ऋतये नमः, ॐ प्रतीच्यै दिशे नमः, ॐ वरुणाय नमः, ॐ वायव्यै दिशे नमः, ॐ वायवे नमः, ॐ उदीच्यै दिशे नमः, ॐ कुवेराय नमः, ॐ ईशान्यै दिशे नमः, ॐ ईशानाय नमः, ॐ ऊर्ध्वायै दिशे नमः, ॐ ॐ ब्रह्मणे नमः, ॐ अधो दिशे नमः, ॐ अनन्ताय नमः। तत उपविश्य प्रणमेत्- ॐ ब्रह्मणे नमः, ॐ अग्नये नमः, ॐ पृथिव्यै नमः, ॐ ओषधिभ्यो नमः, ॐ वाचे नमः, ॐ वाचस्पतये नमः, ॐ विष्णवे नमः, ॐ महद्भ्यो नमः, ॐ अद्भ्यो नमः, ॐ अपाम्पतये नमः, ॐ वरुणाय नमः।

ॐ संवर्च्चसा पयसा सन्तनुभिरगन्महि मनसा स ँ शिवेन । त्वष्टासुदत्रो विदधातु रायोनुमार्ष्टु तन्न्वो यद्विलिष्टम् । (इति मन्त्रेण सजलकरद्वयेन मुखं विमृशेत्) ततो तच्चक्षुरिति अनामिकाङ्गुष्ठाभ्यां चक्षुस्पर्शं कुर्यात् । ॐ तच्चक्षुर्द्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः शतञ्जीवेम शरदः शत ँ शृणुयाम शरदः शतम्प्रब्रवामशरदः शतमदीनाः स्याम शरदः शतम्भूयश्च शरदः शतात् । ततः– ॐ देवागातु विदोगातुं वित्त्वा गातुमित । मनसस्पतऽइमन्देव यज्ञ ँ स्वाहा व्वातेधाः । इति पितृ॰न् विसर्जयेत् । ततः कायेन वाचेति, ईश्वराऽर्पणं कुर्यात् । इति तर्पणविधिश्च समाप्तिमगमत् शुभम् ।

□

॥ यज्ञोपवीताऽभिमन्त्रण-धारणविधिः ॥

आचम्य प्राणानायम्य । देशकालौ सङ्कीर्तनान्ते-अद्य पूर्वोच्चरित एवं गुणविशेषेण विशिष्टायां शुभपुण्यतिथौ मम आत्मनः श्रुतिस्मृतिपुराणोक्त-फलप्राप्त्यर्थं श्रौतस्मार्त कर्मानुष्ठानसिद्ध्यर्थं यज्ञोपवीतधारणं करिष्ये । तदङ्गमभिमन्त्रणं च पूर्वं करिष्ये । ॐ तत्सवितुरिति मन्त्रेण त्रिगुणीकृत्य । ॐ आपोहिष्ठेति ऋचस्य अम्बरीष-सिन्धुद्वीप ऋषिः । आपोदेवता गायत्री छन्दः । यज्ञोपवीतप्रोक्षणे विनियोगः ।

ॐ आपोहिष्ठेति ऋग्भिः प्रोक्षणं कुर्यात् । पुनस्त्रिगुणं कुर्यात् । ततः ।

ॐ हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः । अग्निं या गर्भं दधिरे विरूपास्ता न आपः शᳫ स्योना भवन्तु । यासाँ राजा वरुणो याति मध्ये सत्यानृते

अवपश्यञ्जनानाम् । मधुश्चुतः शुचयो याः पावकास्ता न आपः शᳪस्योना भवन्तु । यासां देवा दिवि कृण्वन्ति भक्षं या अन्तरिक्षे बहुधा भवन्ति । याः पृथिवीं पयसोंदन्ति शुक्रास्ता न आपः शᳪस्योना भवन्तु । शिवेन मा चक्षुषा पश्यतापः शिवया तनुवोपस्पृशत त्वचं मे । सर्वा२ँ॥अग्निरप्सुषदो हुवे वो मयि वर्चो बलमोजो निधत्त । पवमानः सुवर्जनः, पवित्रेण विचर्षणिः, य पोता स पुनातु मा । पुनन्तु मा देवजनाः, पुनन्तु मनवो धिया, पुनन्तु विश्व आयवः, जातवेदः पवित्रवत्, पवित्रेण पुनीहि मा, शुक्रेण देव दीद्यत्, अग्ने क्रत्वा क्रतू२ँ॥रनु, यत्ते पवित्रमर्चिषि, अग्ने विततमन्तरा, ब्रह्मतेन पुनीमहे, उभाभ्यां देवसवितः पवित्रेण सवेन च, इदं ब्रह्म पुनीमहे, वैश्वदेवी पुनती देव्यागात्, यस्यै बह्वीस्तनुवो वीतपृष्ठाः, तया मदन्तः सधमाद्येषु, वयं स्याम पतयो रयीणाम्, वैश्वानरो रश्मिभिर्मा पुनातु, वातः प्राणेनेषिरो मयो भूः, द्यावापृथिवी पयसापयोभिः, ऋतावरी यज्ञिये मा पुनीताम्, बृहद्भिः सवितस्तृभिः, वर्षिष्ठैर्देव मन्मभिः अग्ने दक्षैः पुनाहि मा, येन देवा अपुनत, येनापो दिव्यं कशः, तेन दिव्येन ब्रह्मणा, इदं ब्रह्म पुनीमहे, यः पावमानरिध्येति, ऋषिभिः संभृतंरसम्, सर्वं स पूतमश्नाति, स्वदितं मातरिश्वना,

पावमानीर्यो अध्येति, ऋषिभिः संभृतं रसम् । तस्मै सरस्वती दुहे, क्षीरं सर्पिर्मधूदकम्, पावमानीः स्वस्त्ययनीः सुदुघा हि पयस्वतीः, ऋषिभिः संभृतो रसः, ब्राह्मणेष्वमृतं हितम्, पावमानीर्दिशंतु नः, इमं लोकमथोऽमुम्, कामान्समर्धयन्तु नः देवीर्देवैः समाभृताः पावमानीः स्वस्त्ययनीः, सुदुघा हि घृतश्चुतः, ऋषिभिः, संभृतोरसः, ब्राह्मणेष्वमृतं हितम्, येन देवाः पवित्रेण, आत्मानं पुनते सदा, तेन सहस्रधारेण, पावमान्यः पुनन्तु माम्, प्राजापत्यं पवित्रम्, शतोद्यामं हिरण्मयम्, तेन ब्रह्मविदो वयम्, पूतं ब्रह्म पुनीमहे, इन्द्रः सुनीती सह मा पुनातु, सोमः स्वस्त्या वरुणः समीच्या, यमो राजा प्रमृणाभिः पुनातु मा, जातवेदामोर्जयन्त्या पुनातु, ॐ भूरग्निं च पृथिवीं च मां च, त्रींश्च लोकान् संवत्सरं च, प्रजापतिस्त्वा सादयतु, तया देवतयाङ्गिरस्वद् ध्रुवासीद । ॐ भू भुवो वायुं चान्तरिक्षं च मां च, त्रींश्च लोकान्संवत्सरं च प्रजापतिस्त्वा सादयतु, तया देवतयांगिरस्वद् ध्रुवासीद, ॐ स्वरादित्यं च दिवं च मां च, त्रींश्च लोकान्संवत्सरं च, प्रजापतिस्त्वा सादयतु, तया देवतयाङ्गिरस्वद् ध्रुवासीद, ॐ भूर्भुवः स्वश्चन्द्रमसं च दिशश्च मां च, त्रींश्च लोकान् संवत्सरं च, प्रजापतिस्त्वा सादयतु, तया देवतयाङ्गिरस्वद् ध्रुवासीद ।

ॐ प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तकस्तेनान्नेनाप्यायस्व । नमो रुद्राय विष्णवे मृत्योर्मे पाहि । ॐ ओङ्कारं प्रथमतन्तौ न्यसामि पूजयामि, अग्निं द्वितीयतन्तौ न्यसामि पूजयामि, नागांस्तृतीय तन्तौ न्यसामि पूजयामि, सोमं चतुर्थतन्तौ न्यसामि पूजयामि, पितॄन् पञ्चमतन्तौ न्यसामि पूजयामि, प्रजापतिं षष्ठतन्तौ न्यसामि पूजयामि, वायुं सप्तमतन्तौ न्यसामि पूजयामि, सूर्यं अष्टमतन्तौ न्यसामि पूजयामि, विश्वान् देवान् नवमतन्तौ न्यसामि पूजयामि ।

तत उत्थाय हस्ते गृहीत्वा- सूर्याय दर्शयित्वा ।

ॐ उद्वयन्तमसस्परि स्वः पश्यन्तऽउत्तरम् देवन् देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् इति पठित्वा ।

ततः ॐ स्योना पृथिवी भवानृक्षरा निवेशनी । यच्छानः शर्म सप्रथाः इति भूमौ निधाय। ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम् । इति मन्त्रेण त्रिस्ताडयेत् । प्रतियज्ञोपवीतं दशगायत्रीर्जप्त्वा यज्ञोपवीतधारणार्थं विनियोगं पठेत्- ॐ यज्ञोपवीतमित्यस्य परमेष्ठी ऋषि परब्रह्मपरमात्मा देवता त्रिष्टुप्छन्दः । यज्ञोपवीतधारणे

विनियोगः ।

ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् ।
आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥

दक्षिणबाहुमुद्धृत्य, एकैकम् यज्ञोपवीतं परिधाय आचामेत् । जीर्णं यज्ञोपवीतं शिरोभागेन विसृज्य द्विराचामेत् । विसृष्टं जीर्णं यज्ञोपवीतमादाय "ॐ समुद्रं गच्छ स्वाहा" इत्यादिना मन्त्रेण जले उद्वासयेत् । यथाशक्ति गायत्रीं जप्त्वा भगवते सूर्यनारायणाय जपं निवेद्य, अनेन यज्ञोपवीत धारणाख्येन कर्मणा भगवान् परमेश्वरः प्रीयताम्, हरिः ॐ तत्सत् ।

॥ यज्ञोपवीत-धारणमन्त्रः समाप्तः ॥

शुद्धि–पत्र

पृष्ठ	पङ्क्ति	शब्द संख्या	अशुद्ध	शुद्ध
१	५	२–३	घटिका व्यतीते	घटिकायां व्यतीतायां
१	५	७–८	,, ,,	,, ,,
१	६	३–४	,, ,,	,, ,,
१	८	१	ब्राह्ममुहूर्तेरेति	ब्राह्ममुहूर्त इति
३	१२	३	हैमवर्ण मुदात्तस्स्वॅरो...	हैमवर्णं मुदात्तस्वरो...
३	१३	६	नभो:	नमो
४	१३	६	ध्यानमन्त्रश्त्र	ध्यानमन्त्रश्च
५	३	३	भूर्द्धान	मूर्द्धानं
५	४	२	दिश: श्रोत्रं	दिशः श्रोत्रे
५	८	१	प्रकारान्तरेणजपागायत्री	प्रकारान्तरेणाऽजपागायत्री
६	१	१	नाभो–	नाभी,

पृष्ठ	पङ्क्ति	शब्द संख्या	अशुद्ध	शुद्ध
६	१	६	तत्त्वाय नमः	प्रणवतत्त्वाय नमः
६	४	६	हसौँ निराभासात्मने	हसैँ निराभासात्मने
७	१०	३	नैवेद्यं...	नैवेद्य...
७	१४	(२ पछि)		ॐ परमात्मने नमः (थप्ने)
८	२	३	विभहे	विद्महे
२०	२		तीर्थेष...	तीर्थेषु...
२	१	(अन्त्यमा)	ऽऽचरितो	ऽऽचरित-मुच्छ्वास...
२	२	(अन्त्यलो	गणपति-ब्रह्मा...	गणपति-ब्रह्म...
७	१३		पुष्पाञ्जलिः	पुष्पाञ्जलि...
४८	१०	५	सावित्री	सावित्र्याः
४९	५	३	ॐ आपो...	ॐ ॐ आपो...
४९	६	४	...सिध्यर्थे इति	...सिद्ध्यर्थे नमः इति
४९	१२	[illegible]	ॐ ह्रँ स्यवदेगौभ्	ॐ हूँ स्यवदेगौभ..
५०	१	२	ह्रँ...	हूँ...
५०	७	१	सर्वात्मतेजसे करतल...	सर्वात्मतेजसे [illegible] कर...
५०	[illegible]	[illegible] (को	ह्रँ	हूँ

शुद्धि-पत्र

पृष्ठ	पङ्क्ति	शब्द संख्या	अशुद्ध	शुद्ध
१	५	२-३	घटिका व्यतीते	घटिकायां व्यतीतायां
१	५	७-८	" "	" "
१	६	३-४	" "	" "
१	८	१	ब्राह्ममुहूर्तरेति	ब्राह्ममुहूर्त इति
३	१२	३	हैमवर्ण मुदात्तस्वॅरो...	हैमवर्ण मुदात्तस्वरो...
३	१३	६	नभो:	नमो
४	१३	६	ध्यानमन्त्रश्त्र	ध्यानमन्त्रश्च
५	३	३	भूर्द्धान	मूर्द्धानं
५	४	२	द्विशः श्रोत्रं	दिशः श्रोत्रे
५	८	१	प्रकारान्तरेणजपागायत्री	प्रकारान्तरेणाऽजपागायत्री
६	१	१	नाभो-	नाभी,

पृष्ठ	पङ्क्ति	शब्द संख्या	अशुद्ध	शुद्ध
६	१	६	तत्त्वाय नमः	प्रणवतत्त्वाय नमः
६	४	६	हसौं निराभासात्मने	हसैं निराभासात्मने
७	१०	३	नैवेद्यं...	नैवेद्य...
७	१४	(२ पछि)		ॐ परमात्मने नमः (थप्ने)
८	२	३	विभहे	विद्महे
२०	२		तीर्थेष...	तीर्थेषु...
२	१	(अन्त्यमा)	ऽऽचरितो	ऽऽचरित-मुच्छ्वास...
२	२	(अन्त्यलो	गणपति-ब्रह्मा...	गणपति-ब्रह्म...
७	१३		पुष्पाञ्जलिः	पुष्पाञ्जलिं...
४८	१०	५	सावित्री	सावित्र्याः
४९	५	३	ॐ आपो...	ॐ ॐ आपो...
४९	६	४	...सिध्यर्थं इति	...सिद्धयर्थे नमः इति
४९	११	[illegible]	ॐ ह्लँ स्यवदेर्गौभ्	ॐ ह्लूँ स्यवदेर्गौभ..
५०	१	२	ह्लँ...	ह्लूँ...
५०	७	[illegible]	सर्वात्मतेजसे करतल...	सर्वात्मतेजसे ह्लः फट...
५०	१२	१२-१३ (को	ह्लँ	ह्लूँ

पृष्ठ	पंक्ति	शब्द संख्या	अशुद्ध	शुद्ध
५५	१०		सवितु नारायणाय	सवितृनारायणाय...
५६	७	२	ह्र मध्यमाभ्यां	ह्रूं मध्यमाभ्यां...
५९	८	२	ॐ ह्रः ह्रीं ह्रें ह्रूं ह्रीं ह्रां	उत्तिष्ठ...
६५	१०		राजन्निनो	राजन्नितो
६८	१२		सर्वपापक्षभार्थे	सर्वपापक्षयार्थे
९२	११		त्रयः कुशान्	त्रीन् कुशान्
९७	९		ऊर्ध्वं	ऊर्ध्वं जिघ्रातु

...ENDRA SANSKRIT...
29C42
Acc. 21852

लेखकका अन्य प्रकाशित कृतिहरू

१. सन्तदर्शन (कविता)

२. भवमुक्तिको उपाय

३. नेपाल माहात्म्य

४. पशुपतिनाथ रुद्राक्ष माहात्म्यसहित नेपाल माहात्म्य

५. [illegible]-सूतक तथा व्रतादि निर्णय

६. श्री पशुपतिनाथ दर्शन–परिक्रमा विधि तथा माहात्म्य